श्रीः

उभयवेदान्तग्रन्थमाला

श्री कवितार्किकसिंह-सर्वतन्त्रस्वतन्त्र-

श्रीमद्वेंकटनाथार्य-श्रीवेदान्तदेशिक-

विरचित-मणिप्रवालमय-

श्रीमद्रहस्यत्रयसार-

संस्कृतानुवादः

विद्वद्वरिष्ठैः दक्षिणोत्तरदेशद्वयप्रसिद्धैः (को. न)

श्री. कू. व. नीलमेघाचार्यैः कृतः

श्री बडोदा-चान्दोद-धर्मचक्रोदयमठपीठ मूर्धाभिषिक्तैः

श्री १००८ श्रीयुतस्वामिभिः

अनिरुद्धाचार्य वेंकटाचार्यैः संशोध्य

सुप्रसिद्धकलकत्ता मगनीरामबांगरधर्मद्रविणसाहाय्येन **प्रकाशितः**

...यम्— 1968 रू. 10—00

...पादकाः-अभिनवदेशिक (उत्तमूर् ति.) वीरराघवाचार्याः, मद्रपुरी

रामानुजार्यदिव्याज्ञा प्रतिवासरमुज्ज्वला ।
दिगन्तव्यापिनी भूयात् सा हि लोकहितैषिणी ॥

गुरुपरम्परानुसंधानम् —

अस्मद्गुरूंस्तद्गुरूंश्च प्रणिपत्याखिलान् क्रमात् ।
वेदान्तदेशिकं वयं वादिहंसाम्बुदं गुरुम् ॥

श्रीमन्तं रङ्गराजार्यं रामानुजगुरूत्तमम् ।
प्रणतार्तिहराचार्यं श्रीमल्लक्ष्मणयोगिनम् ॥

महापूर्णं यामुनार्यं रामं पद्मविलोचनम् ।
नाथं शठारिं सेनेशं श्रियं श्रीशञ्च संश्रये ॥

यस्य वाग्वृत्तिपर्यन्ता यतिराजसरस्वती ।
तस्मै वेदान्तगुरवे भूयोभूयो नमोनमः ॥

विगाहे निगमान्तार्यविष्णुपादसमुद्भवाम् ।
रहस्यत्रयसाराख्यां त्रिस्रोतसमकल्मषाम् ॥

अविज्ञातं विजानतां विज्ञातमविजानताम् ।
रहस्यत्रयसाराख्यं परं ब्रह्मास्तु मे हृदि ॥

श्रीदेशिकपर्यन्तगुरुपरम्परा

नारायणः

श्रीः

श्रीविष्वक्सेनः

श्रीशठकोपसूरिः

श्रीमन्नाथमुनिः

श्रीपुण्डरीकाक्षः

श्रीराममिश्रः

श्रीमद्यामुनमुनिः

श्रीमहापूर्णः

श्रीभगवद्रामानुजमुनिः

प्रणतार्तिहराचार्य	श्रीकुरुकेशसूरि-	गोविन्द-एम्बार
रामानुजार्य	श्रीविष्णुचित्तार्य	भट्टार्य
रङ्गराजगुरु	वात्स्यवरदाचार्य	नञ्जीयर्
		नम्बिळ्ळै

श्रीवादिहंसाम्बुदाचार्य
(श्रीरामानुजार्य)
श्रीमद्वेदान्ताचार्य

{ वडक्कुत्तिरु
वीथिप्पिळ्ळै }
लोकाचार्य
तिरुवाय्मोळिप्पिळ्ळै
मणवाळ मामुनि

श्रीवेदान्तदेशिकसंप्रदायस्थानां श्रीभाष्यकारात् प्रणतार्तिहराचार्यादिद्वारा रहस्यार्थप्राप्तिः; कुरुकेशार्यादिद्वारा श्रीभाष्याद्यर्थप्राप्तिः। मणवालमामुनिसंप्रदायस्थानां गोविन्दसूर्यादिद्वारा। त इमे श्रीमन्तो वेदान्ताचार्याः वडकलैसंप्रदायस्थानां सर्वेषामपि सर्ववेदान्तरहस्यग्रन्थेष्वप्याचार्याः; संप्रति तेन्कलैसंप्रदायस्थानामपि उपनिषद्ब्रह्मसूत्र श्रीभाष्य-गीताभाष्यादिवेदान्तप्रस्थाने आचार्याः।

श्रीभाष्यकाराणां श्रीमहापूर्णाः प्रधानाचार्याः ; रहस्यत्रय-संबन्धिकतिपयविशेषार्थोपदेशात आचार्याः श्रीगोष्ठीपूर्णाः । दिव्य-प्रबन्धार्थोपदेशादाचार्याः श्रीमालाधरगुरवः ।

शुभमस्तु

श्रीः

श्रीमते निगमान्तगुरवे नमः

प्रकृतग्रन्थविषयविभागः

श्रीमद्रहस्यत्रयसार इति प्रसिद्धोऽयं ग्रन्थः रहस्यत्रयार्थ-निरूपणेदम्परः । रहस्यत्रयं तावत्—मूलमन्त्र इति श्रीमन्त्र इति च प्रसिद्धः श्रीमदष्टाक्षरमहामन्त्रः । इदं प्रथमं रहस्यम् । द्वयमिति मन्त्र-रत्नमिति शरणागतिमन्त्र इति च प्रसिद्धं द्वितीयम् । श्रीगीता-चरमश्लोकः तृतीयम् ।

अस्य ग्रन्थस्य भूमिकाभूतः गुरुपरम्परासारः ।

ग्रन्थेऽस्मिन् भागचतुष्टयम् ; द्वात्रिंशदधिकाराः । तत्राऽऽदिमः उपोद्घाताधिकारः ।

प्रथमः अर्थानुशासनभागः द्वाविंशत्यधिकारात्मा । तत्र सर्व-वेदान्तप्रमेयनिरूपणेन परतत्त्व-परमहित-परमपुरुषार्थव्युत्पादनम् ।

द्वितीयः स्थिरीकरणभागः—तत्र यथावत् सिद्धसाध्योपाय-तत्प्रभावस्थिरीकरणम् ।

तृतीयः पदवाक्ययोजनाभागः—तत्र रहस्यत्रयघटकपद-तदर्थ-वाक्य-तदर्थनिरूपणम् ।

तुरीयः संप्रदायप्रक्रियाभागः । तत्र आचार्यशिष्यकृत्य-निरूपणम् । अन्ते निगमनाधिकारः ।

शुभमस्तु

श्रीः

श्रीमद्रहस्यत्रयसारे कतिपयांशविशदीकरणम्

पु.

5. **क्षत्रबन्धुः**—एतच्चरितं विष्णुधर्मे 97

पुण्डरीकः भा. अनु. 106 ; इति. समु. 31. 128

9. **कठजाबालादिश्रुति**ष्विति। अत्र, 'यस्य देवे परा भक्तिः यथा देवे तथा गुरौ। तस्यैतेऽकथिता ह्यर्थाः प्रकाशन्ते महात्मनः' इति श्वेताश्वतरश्रुत्यर्थोऽभिमतः। छान्दोग्ये जाबालसत्यकामस्य वाक्यम्, "आचार्याद्धैव विद्या विदिता साधिष्ठं प्रापत्" इति।

सञ्जयेति। 'शुद्धभावं गतो भक्त्या शास्त्राद्वेद्मि जनार्दनम्' इति, 'व्यासप्रसादात् श्रुतवान् एतद्गुह्यमहं परम्' इति च।

रैक्वेति। छान्दोग्ये संवर्गविद्यायां रैक्वजानश्रुत्युपाख्यानम्।

गुरुं प्रकाशयेदिति श्लोके उक्ते **संपदायुषी** उपरि शिष्यकृत्याधिकारे (421) 'ज्ञानवैशद्यपूर्विका भगवदनुभवसंपत्, आत्मसत्तानुवृत्तिहेतुः शेषत्वानुसंधानपूर्वकस्वनिष्ठा च' इति विवृते।

12. **चतुर्विधायां भुवीति**। द्रामिडैः भूमिः पञ्चधा विभज्यते, कुरिञ्जि (पर्वतः), मरुदम् (केदारः), मुल्लै (वनम्), नेय्दल् (अर्णवादि), पालै (मरुप्रदेशः) इति। पर्वतादयः तत्तत्प्रान्तदेशविशिष्टाः ग्राह्याः। मरुप्रदेशस्य मनुष्यवासानर्हत्वात् तद्वर्जं भूभागचतुष्टयमिह गृह्यते।

14. गुरुपरिषदुपज्ञमिति । उपज्ञायत इत्युपज्ञा । समासे क्लीबता । तदुपज्ञं यथा तथेति प्राप्तिक्रियाविशेषणात् गुरुमुखात् प्राप्ति-लाभः । यद्वा गुरुपरिषदुपज्ञं किङ्करत्वाधिराज्यं शास्त्रार्थनिर्णायकसूक्ति-सहितरहस्यं वा प्राप्येत्यर्थोऽस्तु ।

सहस्रस्थूणेति । तलवकारोपनिषदि, 'सहस्रस्थूणे दृढ उग्रे यत्र देवानामधिदेव आस्ते' (श्रु. प्र.) । अपराजिता पूरिति छान्दोग्ये दहरविद्यायाम् । कौषीतक्युपनिषदि पर्यङ्कविद्यायां विरजा नदी, अपरा-जितमायतनम् , विभुप्रमितमण्डपे अमितौजाः पर्यङ्क इत्यादि ।

24. आत्माभिमानानुगुणेति । तिरुवाय्- 9. 4. 4 दुर्ग्र-हपदविवृतौ (पिळ्ळै) अभियुक्तश्लोक उदाहृत एवम् , "आत्माभिमानानु-गुणपुरुषार्थव्यवस्थया । भगवत्पारतन्त्र्यादि प्रबुद्धस्य सुखायते" इति ।

47. पुरुषं मणिवरतयेत्यादि सर्वं श्रीविष्णुपुराणे (६) विशदम् ।

47. शाण्डिलीवृत्तान्तो भारते ।

142. मूलभूतश्रुतिः "न खलु भागवता यमविषयं गच्छन्ति । इहैवैषां केचिदुपप्लवा भवन्ति, काणा भवन्ति, खञ्जा भवन्ति अविधेय-पुत्रा भवन्ति, अविधेयभार्या भवन्ति" इत्यादिः ।

146. उषस्तिवृत्तं छान्दोग्ये 1-10

158. कुण्डधारोपाख्यानम् भा. शा. 277; हरिवंशे

167. **अमानवसंज्ञेति ।** विद्युत्, विद्युत्पुरुषः, वैद्युतः । अमानवः, मानस इत्येवं बहुभिः पदैरुच्यमान एक एवाऽऽतिवाहिकः । स परमपदात् भगवता प्रेषितो नित्यसूरिः चन्द्ररूपातिवाहिकानन्तरमत्राऽऽगतः आब्रह्मप्राप्ति अविसृज्यातिवहति ।

श्रीनारायणीयम् भा. शा. 349

175. धर्मव्याधः वि. ध; भा. वन. 210

श्रमणी. शबरी. रा. आर.

193. ये नाथवन्तइति बलरामं प्रति सात्यकिवचनम् । ययातेः स्वर्गात् पतितस्य तद्दुहितृपुत्राश्चत्वारः शैब्यादयः स्वस्वसुकृतदानेनोद्धमयितार इति दृष्टान्तार्थः (आरण्यपर्वणि) ।

199. **लयभोगार्चनेति ।** लयार्चा, भोगार्चा, काम्यार्चेति लक्ष्म्यर्चामूर्ति त्रैविध्यम् । तत्र भगवद्वक्षसि अर्चा लयार्चा । भगवतः पार्श्वे अर्चा भोगार्चा । भगवन्तं विना पृथगालये प्राधान्येन स्थिता अर्चा काम्यार्चेति भेदः ।

207. विष्णुचित्ताः (एङ्गलाड्वान्), श्रीभाष्यकारशिष्यउभयवेदान्तसिंहासनाधीश. भगवद्विषयगाथाभाष्यकार. श्रीकुरुकेशाख्यदेशिकानां शिष्याः । श्रीवात्स्य वरदाचार्याः तच्छिष्याः (अम्माळ्), श्रुतप्रकाशिकाकाराणामाचार्याः । वादिहंसाम्बुदाः, तेषां वरदाचार्याणां शिष्याः श्रीमद्वेदान्तदेशिकानां साक्षादाचार्याः मातुलाश्च । एभिः प्रपत्तिमधिकृत्य विप्रतिपत्तिविधूननेन संग्रहग्रन्थाः न्यबन्धिषत ।

236. तुलाधार. जाजल्युपाख्यानं भा. शा. 267

242. **विष्णुहस्तप्रदानम्** । मन्त्रदीक्षाकाले शिष्यगात्रे मन्त्रविदाचार्यकरस्पर्शो विहितः विष्णुहस्तप्रदाननाम्ना व्यवह्रियते आगमेषु । तेन दीक्षातिशयः ।

महाभागवतस्पर्शः । "अधिवासादिकं कर्म यथावत् कर्तुमक्षमः । महाभागवतस्पर्शमेकं वा कारयेत् सुधीः" इति विहितो बिम्बस्पर्शः।

258. **ऊनहीने**ति । 'तापः पुण्ड्रस्तथा नाम मन्त्रो यागश्च पञ्चमः' इति पञ्च संस्काराः विहिताः । यागो भगवदाराधनम् । तत्र प्रवृत्तेषु **ऊनः** तापसंस्कारहीनः, **हीनः** पुण्ड्रसंस्कारहीनः, **परिस्रस्तः** नामसंस्कारहीनः, नष्टः मन्त्रसंस्कारहीनः । यद्वा "तथा स्वकर्मशास्त्रेशगुरुसत्संगवर्जिताः । ऊनहीनपरिस्रस्तनष्टाः ज्ञेयाः समाख्यया" इत्युक्तरीत्या स्ववर्णाश्रमधर्महीनः **ऊनः**, स्वसूत्रत्यागी **हीनः**, स्वगुरुदेवतात्यागी **परिस्रस्तः**, सत्संगरहितः नष्टः इति वदन्ति । अन्ये तु ऊनहीनस्रस्तनष्टदग्धा ज्ञेयाः समाख्ययेति उत्तरार्धं पठित्वा, स्वकर्मत्यागी, सूत्रत्यागी, देवतात्यागी, गुरुत्यागी. सत्संगत्यागीति पञ्च क्रमेण ऊनादिनामभाज इत्याहुः । मूले दग्धेति पाठो न लक्ष्यते ।

319. **शास्त्रसिद्धमिति** । सकृदुच्चारः संसारविमोचनं भवतीति श्रुतिः । "अहो द्वयस्य माहात्म्यमहो वीर्यमहो बलम् । किं नु तस्य च मन्त्रस्य कर्मणः कमलासन । न लभ्यतेऽधिकारी वा श्रोतुकामोऽपि वा पुनः ।"....पाद्मे...."को मन्त्रः सर्वमन्त्राणां पुरश्चरणवर्जितः । सकृदुच्चारणात् नृणां ददाति परमं पदम् ।...मन्त्ररत्नं द्वयं

न्यासः प्रपत्तिः शरणागतिः । लक्ष्मीनारायणश्चेति हितं सर्वफलप्रदम् ।.... तस्योच्चारणमात्रेण परितुष्टोऽस्मि नित्यशः ।....शौनकादिमहर्षीणां नैमिशारण्यवासिनाम् । नारदः प्रददौ मन्त्रं प्रपत्ति शरणागतिम्'' इत्यादि ।

332. **दधिभाण्डेति** । दधिभाण्डनामा कश्चित् गोपः । कृष्णः स्वग्रहणार्थमनुद्रुतैः स्वयमग्राह्यत्वाय धावन् तद्गोपगृहं प्रविश्य दधिकटाहेन मामावृणु इति तं गोपमर्थयामास । स तथैवाकरोत् । अनुद्रुतेषु अबुध्वा अपगतेषु कटाहमपनेतुं कृष्णस्तमयाचत । स तु, मह्यं मोक्षमिह जन्मनि ददामीति ब्रूहि, अन्यथा नापनेष्यामीति निर्बबन्ध । कृष्णे प्रतिश्रुत्य पुनः प्रार्थितवति, 'न केवलं मह्यम्, अस्मै दधिकटाहायापि दास्यामीति ब्रूहीत्यवोचत् । अथ तस्मै इव दधिकटाहान्तर्गतजीवायापि मोक्षे संकल्पित एव कटाहमपसारयामासेति कथा ।

409. **पञ्चाग्निविद्या** । ब्रह्मात्मकस्य प्रकृतिविनिर्मुक्तस्य जीवात्मन उपासनरूपा छान्दोग्यादिगता ।

417. **कुलिङ्गशकुनिर्यथेति** । 'कुलिङ्गशकुनिर्नाम हरेर्दारितदन्तिनः । मुखादामिषमादत्ते; वक्ति 'मा साहसं कुरु' ॥ कुलिङ्गशकुनिमुखाद्भवन् शब्दः मा साहसंकुर्वित्येवंरूपः । तत्कार्यं तु जृम्भमाणसिंहमुखे प्रविश्य दन्तलग्नस्य दन्तिमांसस्य हठात् ग्रहणेन निष्क्रमणम् ।

426. **प्रत्येयस्त्विति** । प्रत्यगिति स्वात्मा कथ्यते । प्रत्यक्छब्दार्थ एव प्रत्येय इत्यनेनोच्यते । **प्रत्येयः** प्रतीपमञ्चनीयः । इदमिति ग्राह्यं विना अहमिति ग्राह्यस्तावत् जीवः इदमितिग्राह्यप्रकृतिप्राकृतविलक्षण इति प्रथमवाक्यार्थवर्णनं युक्तम् ।

430. **वान्ताशित्वम्** । उद्गीर्णभक्षकत्वम् । शिष्यक्षेमरूपप्रयोजनमनुद्दिश्य भृत्या आर्जनार्थं प्रतिबोध्य लब्धद्रव्येण जीवनम् ।

430. **वसिष्ठव्यपदेशित्वन्यायः** । विष्णोरहं शेष इति वैष्णवत्वनिर्देशादतिशयितः, अस्य श्रीवैष्णवस्याहं शिष्य इति स्वाचार्यशेषत्वव्यपदेशः ।

1　**इत्थं व्याख्येयभागेषु बहुष्वन्येषु सत्स्वपि ।**
　अवकाशानुरूप्येण केचिदंशाः प्रदर्शिताः ॥

2　**अथाष्टाक्षरमन्त्रार्थयोजनारीतिरुच्यते ।**
　वाक्यैकत्वे द्वे, द्वितायां तिस्रः, त्रित्वे च पञ्च ताः ॥

3　**नारायणे स्यादोंकारवाच्यं मे शरणागतिः ।**
　नारायणे स्यादोमर्थे कैङ्कर्यात्मा नमस्क्रिया ॥

4　**आय नारायणायैवाहं न मे त्विति तत्त्वधीः ।**
　अहं समर्पितोऽस्म्याय तस्मै नास्मि भरो मम ॥

5　**आय नारायणाय स्यां दासोऽनिष्टं न मे भवेत् ।**
　आयास्मि शेषो न मम, स्यां नारायणदास्यकृत् ॥

6　**आयैवाहं माऽस्त्वनिष्टं दास्यं नारायणेऽस्तु मे ।**
　आयैवाहं पमानिष्टं क्षिप त्वद्दास्यदो भव ॥

7　**आयार्पितोऽहं माऽनिष्टं स्यान्नारायणदासता ।**
　आयैवाहं प्रपद्ये तं तत्कैंकर्यं सदाऽस्त्विति ॥

8　**एवं दशभिरर्थैस्तु दर्शिताः दश योजनाः ।**
　आदिमा योजना त्वासु स्यादुपायैकबोधिनी ॥

9　**द्वितीया पुरुषार्थैकपरा तत्त्वपरा परा ।**
　अन्वयव्यतिरेकाभ्यां तुरीया त्वर्पणार्थिका ॥

10　**पुरुषार्थप्रार्थनैव पञ्चम्यां क्रियते द्विधा ।**
　षष्ठयां द्वयं स्वरूपार्थं शेषेण च फलार्थना ॥

11 आद्यश्चाथ स्वरूपार्थं शेषाभ्यां द्विविधे फले ।
आद्ये स्वरूपं शेषाभ्यां गोप्तृत्ववरणं द्विधा ॥
12 आद्ये समर्पणं शिष्टे फलार्थनपरे उभे ।
तत्त्वोपायपुमर्थानां दशभ्यां बोधनं क्रमात् ॥
13 संपादको वात्स्यचक्रवर्ती श्रीवीरराघवः ।
संगृह्यार्थान् मूलमन्त्रयोजनाश्च समग्रहीत् ॥

श्रीरहस्यत्रयसाराधिकारक्रमः

श्रीमद्रहस्यत्रयसारानुवादशोधनिका

4-2	भूताख्य
5-11	गतिश्चासि
7-6	प्रबन्धाः
-12	तोड़प्पर्
8-12	गोष्ठी
11-5	दृप्ति
-22	आलवन्दा
12-10	हयवदन
-18	हयवदन
13-19	नालुमुहक्क
14-6	हृदयंगमः
-12	वैकुण्ठे
15-4	कुर्वाणे
-6	प्राप्त्यर्हे
-11	अवलम्ब
16-16	मतिशयित
17-11	षाकांक्षो
21-8	शाखानामुपरि
24-19	प्रथमरहस्ये
25-2	प्रपत्त्यनुष्ठा
-6	नुष्ठानसमयेनुसंधे
27-15	त्रयसारे प्रधानप्रति-तन्त्रा
30-2	दीप !
-14	श्रुतं
34-15	पिञ्छिकयातत्त्वा
38-8	एतदेक-
39-7	क्रौर्य
40-4	प्रकारैः
45-17	धर्मभूतज्ञानं
-18	प्रत्येव
-21	प्रकाशनशक्ति
46-14	शीलस्याप्य
49-16	कर्मोपाधिक
59-11	शरीरिणः
69-5	श्रीशठकोप
79-7	परिपूर्ण
83-13	निरन्तर
86-14	स्थितंकर्म
88-10	विशिष्यमाणो
90-4	संश्रयन्ते
-13	वश्यम्भवन
91-17	प्रातिकूल्य
92-20	प्रातिकूल्य
97-7	प्रेप्साजनकं
-18	श्रीवादिहंसा
98-8	उपायार्थैक
99-4, 5	स्वल्पांशेनापि
102-21	आत्मापहार
106-8	सांगप्रपदनाधि

114-11	सम्यक्
123-14	पादुकाभ्यां
131-11	कैङ्कर्यमपि
133-17	वर्धकं
137-14	श्रीयामुना
142-3	सुहृदः
161-10	आसीदित्येव
167-6	अमानवसंज्ञ
168-3	पर्यायेण
169-3	मेतन्मनो
171-8	आज्ञाधरै
173-22	राजकुमारं
177-6	निर्व्यापारैः
-7	पुत्रादिभिश्च
199-7	षूपदेशानाम्
207-3	वादिहंसा
217-21	बहिष्का
238-6	जन्मसिद्धाः
241-3	निर्माल्यं
255-4	प्रारब्ध
259-9	अवैष्णव
274-5	प्राप्तत्वात्
317-7	टितः पदैस्त्रि
357-14	धिकारं
366-16	कर्माखिलं
378-22	श्वरगत
381-12	मुपायत्वेन
397-15	तिशयं
412-19	जगन्नाथः
416-13	संबन्धोऽपि
-15	त्यत्रोक्तो यः
417-16	वर्णाश्रमादि
428-12	शिष्यकृता
431-17	श्रुत्वा
532-8	षत्वानुसंधा
-19	श्रोत्रे
438-16	काशमुपविष्टं
4-3-	बहुसंस्कृत

348 पुटे इयं गाथा—

“ओदुमिरण्डै यिशैन्दरुलोलुदवुंतिरुमाळ्
पादमिरण्डुं शरणेनप्पर्ट्रि नम्पंगयत्ताल्
नातनैनण्णि नलंतिकड़ नाट्टिलडिमैयेल्लाम
कोदिलुणर्त्तियुडन् कोल्लुमारु कुरित्तनमे”

349 पुटे इयं गाथा—

ओणूतोडियाळ् तिरुमहळुं तानुमाकि
ओरुनिनैवालीन्न वुयिरेल्लामुय्य
वण्तुवरैनगर् वाड़ वसु देवर्काय्
मन्नवर्कुत्तेर्पाकनाकिनिन्न
तण्तुळवमलर्मार्षन् तानेशोन्न
तनिस्तरुमं तानेमक्काय् तन्नैयेन्नुं
कण्डुकळित्तडिशाइविलक्कायूनिन्न
कण्पुदैयल विलैयाट्टैक्कूकड़िक्किन्नाने ॥

कारिकातिरिक्तश्लोकाः

श्रीरहस्यत्रयसारगताः

भगवतां श्रीनीलमेघाचार्याणामाख्यानम्

अनन्तश्री श्रीभाष्यसिंहासनासीन आचार्य श्री सर्वतंत्रस्वतंत्र उभयवेदान्तप्रवर्तकाचार्य दयादिगुणसागर भगवान् श्रीनीलमेघाचार्यजीका अवतार सन् १९०१ में कोडिप्पाक्कम् गांव, दक्षिण आर्काट मण्डल, मद्रास राज्य में हुआथा। आपके पिताजी का नाम श्रीवरददेशिकाचार्य था। आप की प्रारंभिक शिक्षा तंजौर मण्डल के तिरुवैयार संस्कृतमहाविद्यालय में हुईथी। सन् १९२२ में आपने व्याकरण शिरोमणि परीक्षा प्रथम श्रेणी में पास की। अनन्तर तीन वर्षों में आपने श्रीपरमहंसपरिव्राजकाचार्य श्रीरङ्गरामानुज महादेशिक श्रीकोलियालम् स्वामीजी महराज के आश्रय में श्रीभाष्य गीताभाष्य इत्यादि वेदान्तग्रन्थों का अध्ययन किया।

अनन्तर रींवा राजगुरुके विद्यालय में २ वर्ष, पुष्करश्रीरमावैकुण्ठदिव्यदेशमे ३ वर्ष, श्रीलक्ष्मीनारायण संस्थान सोलापुर में ७ वर्ष वेदान्त और व्याकरण आदि शास्त्रों का अध्यापन करवाते रहे। अनन्तर तिरुपति में श्रीवेङ्कटेश्वर संस्कृत कालेज में १० वर्ष तक व्याकरण का अध्यापन करवाते रहे। अनन्तर वारणसी में श्रीरामानुजमठविद्यालय में 10 वर्ष तक और बृन्दावन के वैष्णवसंस्थान में २ वर्ष तक अध्यापन करवाते, अन्त में १९५९ में वाराणसेय संस्कृत विश्वविद्यालय में श्रीरामानुज वेदान्तके प्राध्यापक नियुक्त हुए। अन्त समयतक यहां ही कार्यकाल रहा। ग्रीष्मावकाश में जब आप

अपना जन्मदेश में विश्राम कर रहे थे, दिनांक २६ जून १९६४ को आपका अकस्मात् परमपद होगया ।

तमिल भाषाके साथ ही साथ संस्कृत तथा हिन्दी भाषा पर भी आपकी अलौकिक अधिकार था । आपने वेदार्थसंग्रह, न्यासविंशति, न्यासतिलक, परमपदसोपान, यतिराजसप्तति के साथ ही साथ "न्यायसिद्धांजन" का भी हिन्दी अनुवाद किया है । ये ग्रन्थ प्रकाशित हो चुके हैं । इन के अतिरिक्त, आपने अष्टश्लोकी, श्रीगुरुपरंपराप्रभाव और वेदान्तकारिकावली का भी संपादन किया है । अनेक पत्र—पत्रिका ओं में आपके लेख प्रकाशित होते रहे हैं ।

आपने श्रीविष्णुसहस्रनाम, श्रीरहस्यत्रयसार और गीतार्थसंग्रह का भी हिन्दीभाषा में विवर्त (अनुवाद) किया है । ये ग्रन्थ अभी प्रकाशित नहीं हुए हैं ।

श्रीरहस्यत्रयसार का संस्कृतविवर्त—

संस्कृत—द्राविडभाषारूप मणिप्रवाल भाषा में लिखित श्रीरहस्यत्रयसार का आपने विशुद्ध संस्कृत भाषा में विवर्त किया था । जिसको मुद्रणकेलिए प्रेसकापीरूप में तयार करके आप अपनी जन्मभूमि तुण्डीरमण्डल में पदारेथे । वहाँ ही आपका अकस्मात् परमपद होजाने से माता जी श्रीलक्ष्मीअम्मालकी आज्ञा से इसका मुद्रण कराया गया है ।

शिष्यसमुदाय

उत्तरापथ और दक्षिणापथ मे आपका शिष्य समुदाय व्याप्त है। उत्तरापथमें आपके शिष्यो में अनिरुद्धाचार्य वेंकटाचार्य, चान्दोद, गुजरात, श्रीवासुदेवाचार्य बम्बई, श्रीकौसलेन्द्र प्रपन्नाचार्यजी अयोध्या, श्रीत्रिदण्डी स्वामी वेदान्तश्रीरामनुजाचार्य जी त्रिदण्डी मठ प्रयाग आदि मुख्य हैं। श्रीरहस्यत्रयसार का हिन्दी और गुजराती अनुवाद भी शीघ्र ही प्रकाशित होगा।

उनके श्रीचरणोंका सेवक
अनिरुद्धाचार्य वेंकटाचार्य

धर्मचक्रोदय मठ चान्दोद बडोदा, गुजरात
दिनांक—4-4-1968.

पुण्यश्लोक महभागवत

श्री मगनीराम जी बांगड

पुण्यश्लोक महाभागवत श्रीमगनीरामजी बांगड का जन्म डीडवाणा राजस्थान श्रीवैष्णव घराने में श्रीमान् श्रेष्ठी श्रीरामप्रसादजी बांगड के यहां पुत्ररत्न के रूपमे हुआ। आपके पितामह का नाम श्रीमान् श्रेष्ठि श्री रामनारायणदासजी बांगड था। उसकाल में उपलब्ध शिक्षा प्राप्तकर दिनो दिन गुरुकृपा, भगवद्भक्तो

सन्तजनों और विद्वानों के सहवास से सत्संग द्वारा शास्त्रज्ञान एवं अनुभव मे बहुश्रुत होगए। भगवत्कथा के श्रवण मे आपकी अलौकिक निष्ठा और अभिरुचि थी।

मनुष्य का जन्म केवल शारीरक बौद्ध एवं नैतिक आवश्यकता ओं को तृप्त करने में भी परिपूर्ण नहीं होजाता। यथार्थ में आध्यात्मिक-प्रकाश प्राप्त करना यह उसकी सब से बडी आवश्यकता है। उसकी प्राप्ति श्रीगुरुकृपाद्वारा ही संभव है। आपने उसकी प्राप्ति श्रीमदित्यादिबिरुदभूषित शमदमदयासमतादिगुणगणार्णव जगद्गुरु श्रीमद्रामानुजाचार्य श्री स्वामीजी महाराज श्री 1008 श्रीबालमुकुन्दाचार्यजी महाराज के श्री चरणों के आश्रित होकर, उनकी कृपा से श्रीमन्नारायण के श्री चरणों मे आत्मसमर्पण किया। इस से एक आदर्श महाभागवत होकर मानवजीवनको सफल बनाया।

श्रीगुरुकृपा से प्राप्त भगवद्भक्ति और श्रीवैष्णव भक्ति और भागवत दिनचर्या के प्रभाव से आपकेलिए अर्थार्जन आदि का काल एवं भक्ति का काल भिन्नभिन्न न होकर सब काल और सब धर्म भक्तिरूप होगऐ। ऐसी भागवत जीवन कला का प्रतिपादन ही श्रीरहस्यत्रयसार ग्रन्थ मे है। आपने सब शास्त्रों के सारभूत श्रीरहस्यत्रयसार के उपदेशों को आचरण में लाकर यथार्थ में प्रपन्नों केलिए आदर्शभूत भागवतजीवन पद्धति से अपना जीवन सफल किया। भागवतधर्मका पालन ही मुमुक्षों को दिनचर्या हैं।

17 वर्ष को अवस्था में आप डीडवाना से कलकत्ता पधारे। जगन्माता श्रीमहालक्ष्मी की आप पर अमित कृपा हुई। गुरुकृपा, भगवत्कृपा, भाग्य और पुरुषार्थ इन चारों के संमेलन से आपकी गणना कुछली काल में धनकुबेरों मे हुई। 40 वर्ष तक निरन्तर कर्मयोगरूप भगवत्कैंकर्य से सतत श्रियः पति का मुखोल्लास करते रहे।

इस काल में भी आप सतत भगवद्भक्तों सन्तो विद्वानों और सत्पुरुषों के सत्संग द्वारा आध्यात्म विद्या का श्रवण मनन करते रहे, जिसके प्रभाव से अहंकार ममकार, मान, मद, मात्सर्य और असूया आदि प्राणिसुलभ दोषों से दूर रह सके। शास्त्रमर्यादा, भक्ति ज्ञान विराग श्रद्धा एवं अनासक्ति से संपन्न होकर स्वस्वरूप (आत्मस्वरूप) के यथार्थ ज्ञाता होगए।

प्राणिमात्र में भगवद्बुद्धि प्राप्त होजाने से जो कोई भी किसी मनोरथ को लेकर अपके पास पहुंचा, उसका अच्युत भाव से 'अच्युतः प्रीयताम्' कहकर सत्कार किया। आप भगवत्प्रेम शास्त्रमर्यादा सदाचार एवं भागवत जीवन की साक्षात् मूर्ति थे। क्षणमात्रकाल भी आपने व्यर्थ नहीं जाने दिया।

"सर्वभूतहिते रताः" होने के कारण आपने अपने धनका सदुपयोग प्राणिमात्र में भगवद्बुद्धिहोने से श्रियः पति की उपासना में किया। अनेक प्राचीनमन्दिरों दिव्यदेशों धर्मशालाओं

पाठशालाओं गोशालाओं एवं कूपों आदि के निर्माण तथा उनके जीर्णोद्धार में किया।

श्रीपुष्कर राजका श्रीरमावैकुण्ठदिव्यदेश डीडवाना का दिव्य देश तथा कलकत्ता का श्रीवैकुण्ठदिव्यदेश आपकी गुरुनिष्ठा और श्रद्धाके मूर्तिमान् स्वरूप हैं।

40 वर्ष तक निरन्तर कलकत्ता में भगवत्कैंकर्य करते हुए मेवास करनेके अनन्तर इस कैंकर्यके अपने प्रतिनिधि स्वरूप में पुत्र और पौत्रों को देकर आप श्रीपुष्कराज श्रीरमावैकुण्ठ में श्रीवैकुण्ठनाथको संनिधि में श्रीरहस्यत्रयसार आदिग्रन्थों का श्रवण और भगवच्चिन्तन करते हुए आजीवन निवास किया। संवत् 2007 की गुरुपूर्णिमा को आप श्रीगुरुचरणो का ध्यान करते हुए गुरुकृपासे श्रीवैकुण्ठ को प्राप्त कर श्रीवैकुण्ठनाथको नित्य कैंकर्य में संमिलित होकर मुक्त होगए। "तेनैव धन्यः पुमान्"। "अनावृत्तिः शब्दात, अनावृत्तिः शब्दात्"।

मितिवैशाखवदि 5 गुरुवार संवत् २०२५

अनिरुद्धाचार्य वेंकटाचार्य

मोहिनी महल, बंबई गुजरात

विषयसूची

परदेवतापारमार्थ्याधिकारः ६ ॥ 55

मुमुक्षुत्वाधिकारः ७ ॥

अधिकारिविभागाधिकारः ८ ॥

अपराधपरिहाराधिकारः १८ ||

प्रभावव्यवस्थाधिकारः २५ ॥

प्रभावरक्षाधिकारः २६ ॥

—o—o—

श्रीः

(श्रीमद्रहस्यत्रयसारसंस्कृतानुवादकीयमङ्गलाचरणादि)

श्रीमद्भिः शेषतार्क्ष्यप्रमुखसुरवरैरेकतः सेव्यमानं
सेनेशश्रीशठारिप्रभृतिभिरनघैश्चान्यतः सूरिबृन्दैः ।
श्रीभूनीलाभिजुष्टं प्रसृमरकरुणापाङ्गमानन्दरूपं
वन्दे पादारविन्दप्रणतपरवशं दिव्यधामाधिनाथम् ॥

सर्वाभीष्टफलप्रदानचतुरो भक्तव्रजानां सदा
धर्मादींश्चतुरः पुमर्थनिवहान् यो दातुकामो भृशम् ।
बिभ्राणश्चतुरो भुजान् करुणया जागर्ति शेषाचले
वन्दे तं हृदयाभिरामवपुषं श्रीवेङ्कटेशं हरिम् ॥

श्रीपादश्रितसद्गताखिलतमस्सूर्यायितानुग्रह-
प्राज्ञाग्रेसरनाथयोगियमुनाजन्मादिभिर्भूषितम् ।
श्रीरामानुजयोगिवर्यनिगमान्ताचार्यगोपालसू-
र्यादिश्रीगुरुवर्धितप्रथमहं वन्दे गुरूणां कुलम् ॥

दृप्यद्धैतुकवादिवर्गकुमतिक्षीबोक्तिसंक्षोभितं
वेदान्तार्थसुधापयोधिमतलस्पर्शं बुधानामपि ।
गाहन्ते सुधियोवगाह्य विमलं यत्सूक्तितीर्थान्तरं
तं रामानुजयोगिपुङ्गवमहं सेवे कृपावारिधिम् ॥

विद्याविस्तप्रदानव्रतहयवदनब्रह्मपादारविन्द-
द्वन्द्वध्यानैकतानस्तदमितकरुणावाप्तवैदुष्यभूमा ।
यस्तादक्षस्वदाक्ष्यक्षपितबहुविधावद्यदुर्वादिपक्ष-
स्तं वन्दे वेदचूडागुरुवरमखिलोज्जीवनार्थावतारम् ॥

ब्रह्मज्ञानप्रदत्वादघपरिहरणादच्छसंविन्मयत्वात्
आनन्दैकाकृतित्वादमितशुभगुणालङ्कृतत्वाद्विभुत्वात् ।
नित्यं सत्यव्रतत्वात्सकलबुधकुलाभ्यर्चितत्वात् वशित्वात्
श्रीमच्छ्रीरङ्गरामानुजगुरुमनिशं विष्णुरूपं नमामि ॥

कवितार्किकपञ्चास्यैर्घण्टांशैर्वेङ्कटेशितुः ।
स्वतन्त्रैः सर्वतन्त्रेषु श्रीमद्वेदान्तदेशिकैः ॥

श्रीमद्वेङ्कटनाथार्यैर्लोकोज्जीवनहेतवे ।
रचितेषु रहस्येषु द्राविडीसंस्कृतात्मना ॥

रहस्यत्रयसाराख्यं रहस्यं लोकविश्रुतम् ।
सर्वशास्त्रार्थसारेण संभृतं परमाद्भुतम् ॥

श्रीरङ्गरामावरजयतीन्द्रचरणाश्रितः ।
वात्स्योऽहं नीलमेघार्यः संस्कृतेन विवर्तये ॥

—०—०—

गुरुपरम्परासारः

(आदावनुसंधेयम् आचार्यविषयं-तनियन्)

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे संनिधत्तां सदा हृदि ॥
रामानुजदयापात्रं ज्ञानवैराग्यभूषणम् ।
श्रीमद्वेङ्कटनाथार्यं वन्दे वेदान्तदेशिकम् ॥

[1](गाथा) कल्याणगुणशालिना तूप्पुल् श्रीवेङ्कटनाथेनोक्तासु लोकहृदयंगमासु प्राचीनसूक्तिषु एकैकैव किं न पर्याप्ता धरण्यां जीवतां परमव्योमारोहगत्यन्तोज्जीवनलाभाय ।

श्रीः

श्रीमते लक्ष्मीहयवदनपरब्रह्मणे नमः
श्रीमते शठकोपाय नमः
श्रीमते भगवद्रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमन्निगमान्तमहादेशिकैरनुगृहीतो

रहस्यत्रयसारः

श्रीवात्स्यनीलमेघाचार्यकृतसंस्कृतानुवादरूपः

—०—०—

आदौ गुरुपरम्परासारः

गुरुभ्यस्तद्गुरुभ्यश्च नमोवाकमधीमहे ।
वृणीमहे च तत्राऽऽद्यौ दम्पती जगतां पती ॥

---

1 शीरोत्रु तूप्पुलतिरुवेंकटमुडैयान् पारोत्रचोन्न पड़(ழ)मोडि(ழி)गुळ—ओरोत्रु ताने अमैयादो तारणियिल् वाड़(ழ)वार्कु वानेर प्पोमलवु वाड़(ழ)वु ।

[1](गाथा) सरोमुनिः, भूताख्य(मुनिः), उन्मत्त(महदाह्वय)-दिव्यसूरिः शीतलताम्रपर्णीमागतः कुरुकेशः, विष्णुचित्तः, शुद्धः कुलशेखरः, अस्माकं प्राणनाथः, भक्ताङ्घ्रिरेणुः, महीसारागतं ज्योतिः, भुवि सर्वत्र वेदा यथा प्रकाशेरन् तथा खड्गकुन्तौ दधानो मङ्गै(नगर)निवासिनां स्वामी इत्येतैः सहर्षं गीताः ऋज्वीर्द्राविडसूक्तिमालाः वयं विशदमधीत्य विशदानवगतान् वेदप्रदेशान् विशदं जानीमहे ॥

[1](गाथा) आनन्दे, समाश्रयणे, अभ्युपगमनीयपुरुषार्थे अप्रच्युत-बहुविधसंबन्धे, रागनिवृत्तौ, स्वसंबन्धापादने, कर्मनिवारणे, कृपोत्कर्षे, तत्त्वोद्बोधने, स्वस्वभावापादने च (विषये) भक्तार्थमेवावतीर्णे गोपाले स्थिते सति सूक्ष्मा(र्था)न् वेदान् द्राविडीकृतवतः (कुरुकेशस्य) चरणावेवावलम्ब्य दुःखरहितभूतेन मधुरकविना प्रदर्शितानादिमार्ग एव धैर्यवतां सन्मार्गाः ॥

---

1 पोय्हैमुनि बूदत्तार् पेयाड़्वार् तण् पोरुनल् वरुम् कुरुकेशन् विट्टुचित्तन्, तुय्य कुलशेकरन् नम पाणनादन् तोण्डरडिप्पोडि मड़िशैवन्दशोति, वैयमेलां मरैविळंग वाळूवेलेन्दुम् मङ्गैयरकोन् पत्रिवर्कल् महिड़्न्दुपाडु, शेय्य तमिड़्मालैकळ् नाम् तेलिय ओदि त्तेलियाद मरैनिलङ्गळ् तेळिकिन्रोमे.

1 इन्बत्तिल् इरैञ्जुदलिल् इशैयुम्पेत्तिल् इकड़ाद पलुरविल् इरागं मात्तिल् तन् पत्तिल् विनै विलक्किल् तहवोक्कत्तिल् तत्तवत्ते उणर्तुदलिल् तन्मैयाक्किल् अन्बर्के अवतरिक्कुमायन् निर्क अरुमरैकल् तमिड़्शेय्दान् ताले कोण्डु तुन्बत्त मदुरकवि तोन्रकाट्टुं तोल्वड़िये नल्लूवड़िकल् तुणिवार्गट्के.

(मुमुक्षूणां सदाचार्यसंबन्धस्यावश्यकत्वसमर्थनम्)

"[1]पापिष्ठः क्षत्रबन्धुश्च पुण्डरीकश्च पुण्यकृत् । आचार्यवत्तया मुक्तौ तस्मादाचार्यवान् भवेत् ॥" इति आचार्यवत्तैव सर्वेषां मोक्षकारणमिति निर्धारयामासुः ॥

(भगवत्पर्यन्ताचार्यपरम्परानुसन्धानकर्तव्यत्वम्)

मुमुक्षोराचार्यवंशो ऽनुक्रमेण भगवत्पर्यन्तगामितयाऽनुसंधेय इत्याम्नातमस्ति ।

(भगवतः परमाचार्यत्वसमर्थनम्)

[2]"तमिमं सर्वसंपन्नमाचार्यं पितरं गुरुम्", इति, [3]"ममाप्यखिललोकानां गुरुर्नारायणो गुरुः" इति, "त्वमेव बन्धुश्च गुरुस्त्वमेव" इति, "गुरुरसि गतिश्चसि जगताम्" इति चोक्तरीत्या सर्वस्यापि लोकस्य परमाचार्यः सर्वेश्वरो ब्रह्मणे आदौ वेदान् प्रदाय, तेषामपहारे जाते पुनस्तान् प्रत्यानीय प्रदाय, एतन्मुखेन शास्त्राणि प्रवर्त्य, एतत्पुत्रान् सनत्कुमारादीन् "स्वयमागतविज्ञानाः निवृत्तिं धर्ममास्थिताः" इत्युक्ताकारान् आपाद्य तन्मुखेन च हितप्रवर्तनं कारयित्वा, इत्थमन्यान्यनारदपराशरशुकशौनकादिबहुमहर्षिद्वारा च अध्यात्मसंप्रदायमविनश्वररूपेण प्रवर्त्य,

"कृष्णद्वैपायनं व्यासं विद्धि नारायणं प्रभुम् । को ह्यन्यो भुवि मैत्रेय महाभारतकृद् भवेत् ॥" इति, "महर्षेः कीर्तनात्तस्य भीष्मः प्राञ्जलिरब्रवीत्" इति चोक्तरीत्याऽवस्थितान् व्यासादीन् अनुप्रविश्य महाभारतशारीरकादीनि प्रवर्त्य च,

हंसमत्स्यहयग्रीवनरनारायणगीताचार्याद्यवतारैः स्वयमेवाविर्भूय च तत्त्वहितानि प्रकाश्य, स्वेनानुगृहीतानामर्थानां सर्वेषां श्रीभीष्मप्रभृतिभिर्ज्ञानाधिकैः संवादञ्च कारयित्वा,

"पञ्चरात्रस्य कृत्स्नस्य वक्ता नारायणः स्वयम्" इत्युक्तरीत्याऽऽदौ स्वेनोपदिष्टं भगवच्छास्त्रं "[10]ब्राह्मणैः क्षत्रियैर्वैश्यैःशूद्रैश्च कृतलक्षणैः। अर्चनीयश्च सेव्यश्च नित्ययुक्तैः स्वकर्मसु ॥ सात्त्वतं विधिमास्थाय गीतः संकर्षणेन यः। द्वापरस्य युगस्यान्ते आदौ कलियुगस्य च ॥" इत्युक्तरीत्याऽवसरेष्वाविष्कृत्य च, "पूर्वोत्पन्नेषु भूतेषु तेषु तेषु कलौ प्रभुः। अनुप्रविश्य कुरुते यत् समीहितमच्युतः ॥" इत्युक्तरीत्या पराङ्कुशपरकालादिरूपेणाभिनवान् विलक्षणान् दशावतारान् कृत्वा, यथा मेघाः समुद्रजलं गृहीत्वा सर्वोपजीव्यपानीयरूपेण प्रवर्षन्ति—तथा वेदार्थेष्वपेक्षितं सारतमांशं सर्वाधिकार्यया भाषया संगृह्य प्रकाश्य च, एवं स्वप्रवर्तितस्य सत्पथस्य प्रकटरूपेण प्रच्छन्नरूपेण चावस्थितैः पाषण्डिभिरुपरोधस्याप्रसक्त्यर्थम्, "[12]साक्षात् नारायणो देवः कृत्वा मर्त्यमयीं तनुम्। मग्नान् उद्धरते लोकान् कारुण्याच्छास्त्रपाणिना ॥" इति. [1]"पीताम्बर उपकारको ब्रह्मगुरुभूत्वैत्य" इति चोक्तरीत्याऽगस्त्यसेविते देशेऽनेकदेशिकापदेशेनावततार।

इदमभिप्रेत्य "कलौ खलु भविष्यन्ति नारायणपरायणाः। क्वचित् क्वचिन्महाभागा द्रमिडेषु च भूरिशः ॥ ताम्रपर्णी नदी यत्र कृतमाला पयस्विनी। कावेरी च महाभागा प्रतीची च महानदी" इति महर्षिरनुजग्राह ॥

(गुरुपरम्परास्वरूपवर्णनम्)

एष्वाचार्येष्वीश्वरमुनीनां पुत्राः नाथमुनयः। एते न्याय-

1 "पीतहवाडै प्पिरानार् पिरमगुरुवाहि वन्दु" पेरियाळ्वार् 5-2-8.

तत्त्वाभिधं शास्त्रं योगरहस्यं चानुजगृहुः । एषां श्रीमधुरकविमूलक-संप्रदायपरम्परया च श्रीमुखसूक्ताख्यदिव्यप्रबन्धमुखेन च योगदशायां साक्षात्कृततया च श्रीशठकोपदिव्यसूरय आचार्या बभूवुः । श्रीनाथमुनीनां पुत्राः ईश्वरभट्टाड़्वान् । (ईश्वरभट्टाड़्वान्) एषां पुत्रा आलवन्दार (श्रीयामुनाचार्याः) । श्रीयामुनाचार्यानुगृहीताः प्रबन्ध आगमप्रामाण्यं पुरुषनिर्णयः, आत्मसिद्धिरीश्वरसिद्धिः संवित्तिसिद्धिरित्युच्यमानं सिद्धित्रयम्, श्रीगीतार्थसंग्रहः, स्तोत्रम्, चतुःश्लोकी चेत्यष्टौ । (आलवन्दार) एषां पुत्राः शोट्टैनम्बि । (शोट्टैनम्बि) एषां पुत्रा एन्नाच्चान् । (एन्नाच्चान्) एषां पुत्राश्चत्वारः । एष्वन्यतमाः पिल्लैयप्पर । (पिल्लैयप्पर्)एषां पुत्राः तोड़प्पर । (तोड़प्पर)एषां पुत्र्यौ द्वे ।

श्रीमन्नाथमुनिश्रीचरणाश्रिताः शिष्याः उय्यक्कोण्डार् (श्रीपुण्डरीकाक्षस्वामिनः), कुरुहैकावलप्पन्, नम्बिकरुणाकरदासर्, एरुतिरुवुडैयार्, तिरुक्कण्णमङ्गैयाण्डान्, वानमादेवियाण्डान्, उरुप्पट्टू-राच्चानपिल्लै, शोकत्तूराड़्वान् इत्यष्टौ ।

(उय्यक्कोण्डार्) पुण्डरीकाक्षस्वामिश्रीचरणाश्रिताः पञ्च । ते यथा—मणक्कालनम्बि (श्रीराममिश्राः), तिरुवल्लिक्केणिप्पाण्पेरुमाळरैयर्, शेट्टलर् शेण्डलङ्कारर्, श्रीपुण्डरीकदासाः, उलहप्पेरुमाळ्नंगै ।

(मणक्कालनम्बि) श्रीराममिश्रश्रीपादाश्रिताः पञ्च । ते च—आलवन्दार् (श्रीयामुनाचार्याः), देयवत्तुकरशुनम्बि, गोमठत्तुतिरुविण्ण-करप्पन्, शिरुप्पुल्लूरावुडैयपिल्लै, आच्चि इति ।

(आलवन्दार्)श्रीमद्यामुनमुनिश्रीपादाश्रिताः पञ्चदश—पेरियनम्बि (श्रीमहापूर्णाः) तिरुक्कोट्टियूरनम्बि (श्रीगोष्ठीपूर्णाः), तिरुमालैयाण्डान् (श्रीमालाधरस्वामिनः), आलवन्दाराड्वार् , तिरुमलैनम्बि (श्रीशैलपूर्णाः), ईशाण्डान् , दैववारियाण्डान् , शिरियाण्डान् , तिरुमो-कूरप्पन् , तिरुमोकूर् निन्रान् , देवप्पेरुमाल् , तिरुमङ्गैयाळियार, पिल्लैतिरुमालिरुञ्चोलैदासर् , मारनेरनम्बि, आल्कोण्डि चेति ।

(पेरियनम्बि)श्रीमहापूर्णश्रीचरणाश्रिताः षट् । ते यथा—एम्बेरुमानार् (श्रीभगवद्रामानुजाचार्याः) मलैकुनियनिन्नार् , आर्य-श्रीशठकोपदासर् , अणियरङ्गत्तमुदनार् तिरुवाय्कुलमुडैयान्भट्टर् , तिरुक्कच्चिनम्बि (श्रीकाञ्चीपूर्णाः) चेति ।

श्रीभगवद्रामानुजाः श्रीगोष्ठीपूर्णश्रीचरणसंनिधौ रहस्यार्थान् शिशिक्षिरे । श्रीमालाधरश्रीचरणसन्निधौ श्रीमुखसूक्तदिव्यप्रबन्धं शुश्रुवुः । आलवन्दाराड्वारश्रीचरणयोः श्रीमुखसूक्तदिव्यप्रबन्धमधीत्य स्तोत्रादिकं कृपाकार्याः सद्वार्ताश्च शुश्रुवुः । तिरुमलैनम्बिश्रीचरण-सन्निधौ श्रीमद्रामायणं शुश्रुवुः । एतदनुगृहीताः प्रबन्धाः श्रीभाष्यम्, दीपः, सारः, वेदार्थसंग्रहः, श्रीगीताभाष्यम्, लघुगद्यम्, पृथुगद्यम्, श्रीवैकुण्ठगद्यम् , नित्यं चेति नव ।

एतच्छ्रीचरणाश्रिताः शिष्याः स्वस्वसंप्रदायानुसारेण ज्ञातव्याः ॥

(गुरुपरम्परानुसन्धानफलत्वयम्)

15"गुरुं प्रकाशयेद्धीमान् मन्त्रं यत्नेन गोपयेत् । अप्रकाश-प्रकाशाभ्यां क्षीयेते संपदायुषी ॥" इत्यूचुः । गुरोः केनचित्प्रकाशनं

केनचिदप्रकाशनञ्च गुरुभक्तौ तारतम्यात् किल भवति। भगवद्विषय इव गुरुविषयेऽपि परां भक्तिमावहते अपेक्षितार्थाः सर्वेऽपि प्रकाशेरन् इत्येतत् कठजाबालादिश्रुतिषु सञ्जयादिवृत्तान्तेषु च प्रसिद्धम्। अनेवंविधानामेवंविधा ज्ञानसंपत् न सिद्ध्येदित्येतत् शिष्याणां ज्ञान-तारतम्येन ज्ञातुं शक्यम्। अत्यन्तं गुणाधिकानां शिष्याणामपि झटिति अध्यात्मविषयान् अप्रकाशयतां निष्ठा न हीयत इत्येतद् रैक्वादिवृत्तान्तेषु प्रसिद्धम्। (शिष्य)लाभं गुणत्वेन मत्वोपदेशे कृते सति, "शिष्यपापं गुरोरपि" इत्युक्ते राचार्यस्य निष्ठा हीयेतेत्येतत्, भविष्यदविचार्यैव इन्द्रस्योपदेशेन स्वयं विस्मृतब्रह्मविद्यस्य स्वशिष्य-भगवत्कारदद्वारा सर्वेश्वरेण प्रबोधनीयतयास्थितस्य चतुर्मुखस्य निकटे द्रष्टव्यम्। इत्थं तावत् "अप्रकाशप्रकाशाभ्याम्" इत्युक्तयोर्द्वयोः "क्षीयेते संपदायुषी" इत्युक्तं फलद्वयमौचित्यप्रमाणप्रसिद्धिभ्यां क्रमेणोदाहृतम्। द्वयोः (प्रत्येकं) फलद्वयस्यान्वयेऽपि वाक्ये आपतन् कश्चिदपि विरोधो नास्ति। अतः सर्वावस्थासु गुरुभक्ति-परीवाहात्मना गुरोः प्रकाशनम्, महारत्नगर्भमाणिक्यसंपुटा-यमानश्रीमन्त्रसमुत्कर्षस्य स्वनिष्ठायाश्चाविनाशार्थं क्षुद्रप्रयोजनोद्देशेन शिष्यगुणपूर्तिरहितेभ्यश्चपलेभ्योऽप्रकाशनेन मन्त्रस्यातीव गोपनं च कर्तुं युक्तम्। अत्र गुरुशब्दः परमगुरूणामप्युपलक्षकः; सामान्यवाची वा। मन्त्रशब्दो मन्त्रार्थप्रभृतीनां रहस्यानां प्रदर्शनपरः।

एवमेतेषां रहस्यानामनुसंधानसमयेषु सर्वेषु आचार्यपरम्पराया अनुसन्धानमपि विधिबलप्राप्तम्।

एषामाचार्याणामनुसंधानं "संभाष्य पुण्यकृतो मनसा ध्यायेत्" इत्युक्तरीत्या प्रतिषिद्धसंभाषणस्य प्रायश्चित्तमपि भवति ॥

—o—o—

(गुरुपरम्परानुसंधानप्रकारस्य गाथया निरूपणम्)

[1](गाथा) मम प्राणं दत्त्वा रक्षितवन्तं शरणमेत्याहं क्रमेण तद्गुरुपंक्तिं प्रणम्य ततः, कृपया महाभूतपुर्यामाविर्भूतः परमोदारः, महापूर्णः, यामुनमुनिः, राममिश्रः, सन्मार्गं तस्योपदिष्टवान् पुण्डरीकाक्षः, नाथमुनिः, शठकोपः, सेनानाथः, भोग्यामृतश्रीदेवी इत्येतान् पुरस्कृत्य अस्मत्स्वामिनः श्रीचरणावाश्रयामि ॥ ३ ॥

(गुरुपरम्परासारान्ते आचार्यैरेव कृतानि पद्यानि)

(अधिकपाठः) प्रपदनमये विद्याभेदे प्रतिष्ठितचेतसः

प्रतिपदमिह प्रज्ञादायं दिशन्तु दयाघनाः ।

शठरिपुशुकव्यासप्राचेतसादिनिबन्धन —

श्रमपरिणमच्छुद्धाशुद्धाशया मम देशिकाः ॥)

एते मह्यमपोढमन्मथशरोन्माथाय नाथादयः

त्रय्यन्तप्रतिनन्दनीयविविधोदन्ताः स्वदन्तामिह ।

---

1 एन्नुयिर् तन्दलित्तवरै च्चरणम्बुक्कि यानडैवे अवर् गुरुक्कल् निरै वणंगि, पिन्नरुळाल् पेरुम्बूदूर् वन्द वल्लल् पेरियनम्बि आलवन्दार् मणक्कालनम्बि, नन्नेरियै अवर्कुरैत्त उय्यक्कोण्डार् नातमुनि शडकोपन् शेनैनातन् इन्नमुदत्तिरमहळ् एन्निवरै मुन्निट्टेम्बेरुमान् तिरुवडिहळ् अडैकिन्रेने ।

श्रद्धातव्यशरण्यदम्पतिदयादिव्यापगाव्यापकाः

स्पर्धाविप्लवविप्रलम्भपदवीवैदेशिका देशिकाः ॥

हृद्या हृत्पद्मसिंहासनरसिकहयग्रीवहेषोर्मिघोष—

क्षिप्तप्रत्यर्थिदृप्तिर्जयति बहुगुणा पङ्क्तिरस्मद्गुरूणाम् ।

दिक्सौधाबद्धजैत्रध्वजपटपवनस्फातिनिर्धूततत्तत्—

सिद्धान्तस्तोमतूलस्तबकविगमनव्यक्तसद्वर्तनीका ॥

(ग्रन्थमुखेनोपकारकाणां पूर्वाचार्याणां स्तवनम्)

(गाथा) वेदान्तशास्त्रमार्गार्जवं विनाशयतां हैतुकानां (विषये) अद्वितीयवारणीभूय तद्वादकदलीर्विनाशितवत उपकारकस्यानुरूपालंकारभूतकीर्तेः रामानुजमुनेर्भोग्यतमोक्तिसंगतगुणालंकृतचिन्ताः न चिन्तयेमहि इतः परं क्रूरकर्माणि ॥ ४ ॥

(गाथा) दीर्घकालात्संसरन्तोऽधुना विधिभेदात् बोधं प्राप्तवन्तो वयं प्रत्यावृत्य, इतःपरमपि कर्ममयशरीरेणैकीभूय निपत्य यथा न परिभ्रमेम तथा, रक्षार्थमागत इति प्रशस्येन जयेन कृपादानेन च विद्योतमानकल्याणगुणस्य श्रीयामुनार्यस्य दासभूता वयं न पठेमेतः परमपन्यायान् ॥ ५ ॥

---

4 आरणनूल्वॆवड्ंचव्वै यऴिक्किडुमैतुहर्कोर् वारणमाय् अवर् वादक्कदलिकल् मायत्त पिरान्, एरणिकीर्ति इरामानुशमुनि इन्नुरैशेर् शीरणि शिन्दैयिनोम् शिन्दियोम् इनि त्तीविनैये.

5 नीळवन्दिन्नु विदिवहैयाल् निनैवोन्रिय नाम् मीळवन्दिन्नुं विनैयुडम्बोन्रि विऴुन्दुऴलादु अळवन्दारेन वेत्ररुळ्तन्दुविळङ्गियशीर् आळवन्दारडियोम् पडियोम् इनि अल्वऴक्के ।

(गाथा) काहलीशङ्खसदृशयोः समीचीनभक्तयोर्दासयोः तालमुपदिश्य द्राविडवेदानां मधुरं गानमुपदिष्टवतः परमोदारस्य स्पृहणीयं तपोमार्गं प्रवर्तितवतो नाथमुनेश्चरणौ अनुदिनं प्रणम्योन्नमेम ; अस्माकं के वा सदृशाश्चतुर्विधायां भुवि ? ॥ ६ ॥

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु श्रीगुरुपरम्परासारः संपूर्णः ।

॥ श्रीमते निगमान्तमहादेशिकाय नमः ॥

—o—o—

श्रीमते हयवदनपरब्रह्मणे नमः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे संनिधत्तां सदा हृदि ॥ १ ॥

रामानुजदयापात्रं ज्ञानवैराग्यभूषणम् ।
श्रीमद्वेङ्कटनाथार्यं वन्दे वेदान्तदेशिकम् ॥ २ ॥

---

6 काळं वलम्पुरि यन्न नकोदूल अडियवर्कुत् ताळ वङ्गि समिदुमरैयिन्निशै तन्दवळल् मूळुंतवनेरिमूट्टिय नादमुनिकड़ले नाळुं तोडदेडुवोम् नमक्कार् निगर् नानिलत्ते ॥

चतुर्विधायां—मरुदम्, नेय्दल्, कुरिञ्जि, मुल्लै इत्युच्यमानाः ग्रामसिंधुगिरिवनप्रदेशाश्चत्वारः । पञ्चमोऽप्यस्ति मरुप्रदेशः स निर्मनुष्यत्वादुपेक्ष्यते ।

श्रीः

अथ श्रीरहस्यत्रयसारः

प्रथम उपोद्घाताधिकारः

(मङ्गलाचरणम्)

आभगवत्तः प्रथितामनघामाचार्यसन्ततिं वन्दे ।
मनसि मम यत्प्रसादात् वसति रहस्यत्रयस्य सारोऽयम् ॥५॥
कर्मब्रह्मात्मके शास्त्रे कौस्कुतनिवर्तकान् ।
वन्दे हस्तिगिरीशस्य वीथीशोधककिङ्करान् ॥ ६ ॥

(ग्रन्थार्थसंग्रहगाथा)

[1](गाथा) रक्षेत् न्यासभूतान् अस्मानिति पङ्कजवासिनीवल्लभचरणयुगलमाश्रित्यास्माकमपि तद् दत्तवद्भिर्दयालुभिः,विजृम्भमाणानां तमसां विनाशनार्थमभिनिविश्योपदिष्टस्य (रहस्य)त्रयस्य तात्पर्यमनुदिनं सम्यगनुभवितुमत्रास्माकमसदृशो विधिरुपनतो भवति ॥ ७ ॥

(प्रथमाधिकारार्थसंग्रहश्लोकः)

मणिवर इव शौरेर्नित्यहृद्योऽपि जीवः
कलुषमतिरविन्दन् किङ्करत्वाधिराज्यम् ।

---

1 आलुमडैक्कलमेन्रेम्मै अम्बुयत्ताल् कणवन् ताळिणै शेर्न्दु एमक्कुमवै तन्द तहवुडैयार् मूळमिरुळ्क्कळ् विल मुयन्रोदिय मून्रिनुळ्ळं नाळमुहक्कूकविंगे नमक्कोर् विधि वायकिन्रदे ।

विधिपरिणतिभेदाद्दीक्षितस्तेन काले
गुरुपरिषदुपज्ञं प्राप्य गोपायति स्वम् ॥ ७ ॥

(जीवात्मनः स्वाभाविकाकारनिरूपणम्)

श्रियः पत्युः सर्वेश्वरस्य श्रीकौस्तुभस्थानीयः सन्, हृदयंगमः "कुमार" इति "पुत्र" इति "प्रेष्य" इति "शेषभूत" इति "दासभूत" इति च तत्तच्छास्त्रेषु प्रतिपन्नोऽस्ति जीवात्मा।

(जीवात्मनः पूर्णपरतत्त्वानुभवार्हतानिरूपणम्)

अस्मिन्—

स्वस्य स्वभावप्राप्तशेषिणः, अज्ञानशून्यानाममराणामधिपतेः निरतिशयातिशयितानन्दवतः, अस्माकं पुष्पवासिन्याः पूर्णायाश्च स्निग्धस्य, भौमानां परमव्योमस्थानां च स्वामिनः सर्वेश्वरस्य, "वैकुण्ठे[1] तु परे लोके श्रिया सार्धं जगत्पतिः। आस्ते" इति, "[2]उज्ज्वलहस्तवलयायां श्रियां त्वयि चैव सुस्थितयोः" इति चोक्तरीत्या श्रीमहालक्ष्म्या सह निर्मले परमव्योम्नि "[3]याऽयोध्येत्यपराजितेति विदिता नाकं परेण स्थिता" इत्येवम् अयोध्यादिशब्दवाच्यायामक्षोभ्यमहानगर्यां सहस्रस्थूणादिवाक्याम्नाते श्रीमहामणिमण्टपे कौषीतकिब्राह्मणाद्याम्नाते पर्यङ्कविशेषे "[4]गमने छत्रं भवति आसिकायां सिंहासनं भवति" इति "निवासशय्यासन" इति चोक्तरीत्या सर्वदेशसर्वकालसर्वावस्थोचितानां सर्वविधकैङ्कर्याणां सर्वविधशरीरैरनुभवेन शेषत्वस्यैव स्वनिरूपकत्वादन्वर्थशेषाभिधाने, श्रीमदनन्तसूरिरूप-

2 'ओण् तोडियाळ्तिरुमहळुं नीयुमे निलानिर्प' (तिरुवाय् 4-9-10)
4 'शेनाल् कुडैयाम् इरुन्दाल् शिंगाशनमाम्' (प्रथमान्तादि 53)

श्रीशय्याविशेषे परमव्योमयुवराजरूपेण विराजमानस्वपरिपाटीं सर्वात्मानोऽप्यनुभूय कृतार्था भवन्त्विति सहृदयतया स्थितस्य स्थितिं तां हेतुमवलम्ब्य नित्यानुभवं कुर्वाणैरनन्तमहानन्ददासैर्नित्यसूरिभिः सह अविशेषेण स्वयमपि **स्वामिकैङ्कर्यस्य स्वरूपयोग्यतया** (दायस्येव) सहजप्राप्त्यर्हेऽपि—

(जीवात्मनो विपरीताकारस्थितेर्निरूपणम्)

अनादिमायया सुप्ते, "[6]अनेकजन्मसाहस्रीं संसारपदवीं व्रजन् मोहश्रमं प्रयातोऽसौ वासनारेणुकुण्ठितः ॥" इत्युक्तरीत्या प्रकृतिरूपे मरुकान्तारे निपत्य धावं धावं बहूनि जन्मानि प्राप्य पुरुषार्थमनासाद्य आवलम्बमलब्ध्वा मालिन्यमुपेत्य ज्ञानहान्या तत्त्वहितविषययथावत्प्रकाशरहिते सति—

(राजकुमारदृष्टान्तवर्णनम्)

यथा कस्मिंश्चिद्राज्ञि अन्तःपुरेण सह मृगयार्थं निष्क्रम्य मृगयाविहारे विशेषसक्ते जाते भाषाज्ञानात्प्रागेव मार्गाद् भ्रष्टो राजकुमारो ग्रहीतृजनहस्तगतशिशुः सन् यस्मिन् कस्मिंश्चित् कुटीरे वर्धमानोऽस्वकीयां शबरत्वादिजातिं स्वस्मिन् आरोप्य "[7]माताऽप्येका पिताऽप्येको मम तस्य च पक्षिणः। अहं मुनिभिरानीतः स चानीतो गवाशनैः ॥ अहं मुनीनां वचनं शृणोमि गवाशनानां स वचः शृणोति। प्रत्यक्षमेतम् भवताऽपि दृष्टं संसर्गजा दोषगुणा भवन्ति ॥" इत्युक्तरीत्या व्याधश्रेणीस्थशुकवत्तदभ्यासितां वाणीमेव स्ववाणीत्वेन तदौरसवत् तद्भक्ष्यजीविके(वृत्ती) एव स्वभक्ष्यजीविकात्वेन श्रयन्, स्वजात्युचितेषु **भोगेषु आचारसंस्कारादिषु च प्राथमिकज्ञानेनापि शून्यो**

राजभोगविरुद्धेषु जुगुप्सितविषयेषु स्वस्य लाभहानिभ्यां हर्षशोकौ आवहन्, अयं राजकुमारः इति स्वकीयां जातिं जानानेषु केषुचिद् ऋषिप्रायेषु सत्स्वपि तदुपसर्पणानर्हामवस्थां बिभ्रत्, एवं भ्रान्तिसिद्धशबरत्वाद्यवस्थया सह यावज्जीवं वर्तते उत्तरजन्मस्वपि योग्यताप्राप्तिविषये उपायशून्यः प्रतिबद्धपुरुषार्थश्चावतिष्ठेत—तथाऽस्मिन्नपि देहात्माभिमानादिभिः स्वस्वरूपं हित्वा पररूपमारोप्य स्थिते सति—

(राजकुमारदृष्टान्तेनैव जीवात्मनो धार्मिकसहवासतत्फलवर्णनम्)

यथा तस्य राजकुमारस्य लक्षणादिभिर्जातिविशेषमभिजानन्तः केचन धार्मिकाः केनचिदुपायेनैनं वशीकृत्य अभिमानं कृत्वा अस्याऽऽगन्तुकं जात्यन्तराभिमानं निराकृत्य दृष्टादृष्टसंस्कारादिभिरुत्तरोत्तरभोगतदुपाययोग्यतापादकमुपायं कृत्वा अस्मिन् स्वजात्यनुरूपाणि गुणवृत्तानि स्वोपदेशानुष्ठानाभ्यां सुस्थिरं निवेश्य अस्यानेकदोषदुष्टेषु शबरादिभोग्यक्षुद्रविषयेषु जुगुप्सामुपजनय्य राजादिभोग्यानामतिशायितपुरुषार्थानां विवेचनपूर्वकोपादानप्रयोजकं ज्ञानमुत्पाद्य स्थापयेयुः, तथा इममात्मानं केषुचित् धार्मिकेषु पित्रादिमुखेन संभाष्य, पुमान् न देवो न नरो न पशुर्न च पादपः। शरीराकृतिभेदास्तु भूपैते कर्मयोनयः॥" इत्युक्तरीत्या देहविलक्षणैतत्स्वरूपस्थितिं प्रबोध्य तदनुरूपपुरुषार्थतदुपायेष्वन्वयोपपादकमुपायं कृत्वा देहकबलीकृतस्वरूपत्वदशाहा[प]नपूर्वकं प्रकाशातिशयविशेषसंपन्नानां संभवन्ति गुणवृत्तान्युत्पाद्य हेयोपादेयविभागक्षमं कृत्वा स्थापितवत्सु सत्सु—

इदमीयां प्राथमिकस्थितिं **धार्मिकविशेषसहवासप्रभवां योग्यतां** बुद्धिमत्तां च स्वयं साक्षात्कृत्य **परमकारुणिकेन परमशेषिणा प्रेरितैः** स्वयं च **कारुणिकोत्तमैः** सद्भिः कैश्चिद्देशिकैः—

"ईश्वरस्य च सौहार्दं यदृच्छासुकृतं तथा। विष्णोः कटाक्षमद्वेषमाभिमुख्यं च सात्त्विकैः। संभाषणं षडेतानि ह्याचार्यप्राप्तिहेतवः" इत्युक्तरीत्या यदृच्छया सन्निधाय,—यथा तस्य राजकुमारस्य कैश्चित् राजान्तरङ्गैर्यदृच्छया सन्निधाय जन्मतत्त्वमवगमय्य भावीनि **प्रियतमानि हिततमानि** च विशदं ज्ञापयित्वा केनचिदुपायविशेषेण तस्य **राज्ञो राजकुमारस्य** च **परस्परसंश्लेषाकाङ्क्षो**तभ्येत—तथाऽस्यापि "[10]नाथं देवो न मर्त्यो वा न तिर्यक् स्थावरोऽपि वा। ज्ञानानन्दमयस्त्वात्मा शेषो हि परमात्मनः॥" इति, "[11]दासभूताः स्वतः सर्वे ह्यात्मानः परमात्मनः" इत्येवं च प्रमाणैः प्रतिपादितदिशा, जृम्भमाणसमुद्रपरिवृतां भुवं परमाकाशलोकं च निश्शेषं परिपालयता सत्प्रभुणा श्रियः पत्या नारायणेन सह स्वाभाविकसहजसंबन्धं विशदं ज्ञापयित्वा, अस्य तत्प्राप्त्युपायेषु प्रयस्य—

एतल्लभ्यं पुरुषार्थमेव स्वस्य कृत्स्नदिव्यविभूतिलीलाविभूतिपालनरूपमभिनन्द्य,

तन्मूलकं तदात्वप्रसूतवत्सगोचरवात्सल्यशालिक्षीरक्षरणोद्यतधेनुन्यायेन एभिर्देशिकैः (देशिकीभूयेत्यर्थः) अस्य जीवात्मनोऽज्ञानसंशयनिवृत्तिमभिसन्धाय अनतिविस्तरसंक्षेपं उच्यमानैः (आविर्भाव्यमानैः)वचनैः "[12]तत्त्वेन यश्चिदचिदीश्वरतत्स्वभाव" इत्याद्युक्तरीत्या **ईश्वरस्येशितव्यानां** च **स्वरूपस्वभावसंबन्धाः भोगापवर्गौ** त्याज्योपादे-

यैतदुपायाः एषां गतिप्रकाराः उक्तानुक्ता मोक्षविरोधिन इत्येतेऽर्थाः मुमुक्षुणा एनेनाऽऽत्मना ज्ञातव्याः ।

(एषामर्थानां रहस्यत्रयप्रतिपाद्यत्वोपक्षेपः)

एतेऽर्थाः सर्वेऽपि अध्यात्मविषयशब्दराशौ सारतमे रहस्यत्रये प्रतितन्त्रसारोद्धारेण संगृह्यन्ते (संगृहीताः सन्ति) ॥

(अधिकारार्थसंग्रहगाथा)

[1](गाथा) श्रिया सह आविर्भूतस्य श्लाघ्यमणेरिव [अस्माकं] लक्ष्मीवल्लभहृदयं सप्रेमवासस्थानमिति यथोच्येत, तथा चरणारविन्दोत्तंसन-भाग्यं प्राप्तवन्तो वयम् आगर्भानुवृत्तक्रूरकर्मनद्यां निपत्य यथा न प्रोह्येमहि, तथा कृपां कर्तुं सूक्ष्मार्थेन सह पञ्चकज्ञाः समुपनताः सन्ति हि ॥ ८ ॥

(अधिकारार्थसंग्रहपद्यम्)

कर्माविद्यादिचक्रे प्रतिपुरुषमिहानादिचित्रप्रवाहे
तत्तत्काले विपक्तिर्भवति हि विविधा सर्वसिद्धान्तसिद्धा ।
तल्लब्धस्वावकाशप्रथमगुरुकृपागृह्यमाणः कदाचित्
मुक्तैश्वर्यान्तसंपन्निधिरपि भविता कश्चिदित्थं विपश्चित् ॥

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीमद्रहस्यत्रयसारेउपोद्घाताधिकारः प्रथमः ॥
॥ श्रीमते निगमान्तमहादेशिकाय नमः ॥

तिरुवुडन् वन्द शेङ्गमणिपोल् तिरुमालिदयम् मरुविडमेन्न मलराङ्ि शूडुं वहै पेरुनाम्, करुवुडन् वन्द कडुविनै यार्ट्रिल् विडुन्दो-ऴ्हादु अरुवुडनैन्दरिवार अरुळ्शेय्य अमैन्दनरे ॥

श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

सारनिष्कर्षाधिकारो द्वितीयः

(अधिकारार्थसंग्रहोपक्रमश्लोकः)

श्रुतिपथविपरीतं क्ष्वेलकल्पं श्रुतौ च
प्रकृतिपुरुषभोगप्रापकांशो न पथ्यः ।
तदिह विबुधगुप्तं मृत्युभीता विचिन्व-
न्त्युपनिषदमृताब्धेरुत्तमं सारमार्याः ॥

(रहस्यत्रयस्यैव मुमुक्ष्वादरणीयत्वम्)

अस्मिन् **रहस्यत्रये** श्रीमन्त्रस्य "[1]सर्वमष्टाक्षरान्तस्स्थम्" इत्युक्तरीत्या स्वार्थे ज्ञाते **सर्वार्थ**ज्ञापनस्वभावतयाऽवस्थानात्, **चरमश्लोकस्य** "[2]सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज" इति स्वोक्तस्योपायस्यैकस्यैवावलम्बने सर्वोपायफलसिद्धिर्भवतीत्यर्थस्थापकत्वात्, **द्वयस्य** च कठश्रुत्याद्युक्तरीत्या स्वं सकृदुच्चारितवतो विषये **सर्वप्रकारकृतकृत्य**त्वापादनौपयिकवैभववत्त्वाच्च **रहस्यत्रयमेव मुमुक्षुणा आदरणीयम्** ।

(असाराल्पसारादिविवेचनम्)

"असारमल्पसारञ्च सारं सारतरं त्यजेत् ।
भजेत् सारतमं शास्त्रे रत्नाकर इवामृतम् ॥"

परमपुरुषार्थस्य तदुपायस्य च प्रत्यक्षादिप्रमाणैर्दुर्ज्ञानतया, एतयोर्विषये "[3]शास्त्राद्वेद्मि जनार्दनम्" "[4]तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ" "[5]शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति" इत्युक्तरीत्या शब्द एव प्रमाणम् ॥

तत्र "[6]अनन्तपारं बहु वेदितव्यमल्पश्च कालो बहवश्च विघ्नाः । यत् सारभूतं तदुपाददीत हंसो यथा क्षीरमिवाम्बुमिश्रम् ॥" इति श्लोके सारभूतमिति पदेन प्रतिपन्नः (न्नं) निरुपाधिकसारं विषयीकुर्वन् सारतम शब्द उपादेयः । बाह्यकुदृष्टिशास्त्राण्यत्यन्तासारत्वादनुपादेयानि । वेदे पूर्वभागे ऐहिकफलसाधनप्रतिपादकः प्रदेशोऽत्यल्पसारत्वादनुपादेयः । आमुष्मिकफलसाधनप्रतिपादकांशः ऐहिकफलातिशयितफलकत्वात् केषाञ्चित् सारत्वेन सुवचोऽपि दुःखमूलत्वादिदोषदुष्टत्वादनुपादेयः । आत्मतत्प्राप्तितत्साधनमात्रप्रतिपादकः अंशोऽपि सारतरः सन्नपि ततोऽप्यत्यन्तातिशयितपरमात्मानुभवसापेक्षाणामनुपादेयः । परमात्मतत्प्राप्तितदुपायप्रकाशकः प्रदेशः सारतमत्वाद्विवेकिन उपादेयः ॥

(तत्रापि रहस्यत्रयस्यैवात्यन्तोपादेयत्वम्)

तत्राप्यंशे प्रधानप्रतितन्त्राणां तत्त्वहितानां संग्रहरूपत्वादत्यन्तं सारतमं भवति रहस्यत्रयम् । अतः "[7]बहुभ्यश्च महद्भ्यश्च शास्त्रेभ्यो मतिमान् नरः । सर्वतः सारमादद्यात् पुष्पेभ्य इव षट्पदः ॥" इत्युक्तरीत्या रहस्यत्रयं मुमुक्षोरस्याऽऽत्मनोऽत्यन्तमुपादेयं भवति ॥

(अधिकारार्थसंग्राहकगाथा)

[1](गाथा) अपर्याप्तानीमानीत्याशया लोके (अभ्यस्यमानेषु) अष्टादशसु भारायमाणेषु विद्यास्थानेषु परितः (ग्राह्यत्वाय) समागतेष्वपि, संख्यापूरकाणीमानीति (निश्चित्य) अनिमेषैर्देवैः स्तुतमष्टकं द्वयं च गणयन्तोऽस्मत्समयाचार्याः चातुर्ययुतां विलक्षणां स्थितिं दिदिशुः ॥

(अधिकारार्थसंग्राहकपद्यम्)

शाखानामुपरिस्थितेन मनुना मूलेन लब्धात्मकः
सत्ताहेतुसकृज्जपेन सकलं कालं द्वयेन क्षिपन् ।
वेदोत्तंसविहारसारथिदयागुम्भेन विस्रम्भितः
सारज्ञो यदि कश्चिदस्ति भुवने नाथः स यूथस्य(स्स) नः ॥

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीरहस्यत्रयसारे सारनिष्कर्षाधिकारो द्वितीयः ॥
श्रीमते निगमान्तमहादेशिकाय नमः

—o—o—

---

1 अमैयाविवै एन्नुमाशैयिनाल् अरुमूत्तलहिल् शुमैयान कल्विहल् शूऴ्वन्दालुम्, तोहै यिवै येन्र इमैयाविमैयवरेत्तिय एट्टिरण्डेण्णिय नम् शमयाशिरियर् शदिर्कुं तनिनिलै तन्दनरे ॥

श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ प्रधानप्रतितन्त्राधिकारः तृतीयः ॥

(अधिकारार्थसंग्राहकश्लोकः)

आधेयत्वप्रभृतिनियमैरादिकर्तुः शरीरं
सत्तास्थेमप्रयतनफलेष्वेतदायत्तमेतत् ।
विश्वं पश्यन्निति भगवति व्यापकादर्शदृष्टे
गम्भीराणामकृतकगिरां गाहते चित्तवृत्तिम् ॥

(प्रतितन्त्रशब्दार्थः)

प्रतितन्त्रशब्दार्थस्तावत्—इतरसिद्धान्तिषु केनाप्यनभ्युपगतः स्वसिद्धान्तस्यैवासाधारणोऽर्थः । इह वेदान्तिनामस्माकं दर्शनस्यैव असाधारणाः प्रधानभूताश्चार्थाः के इति चेत्—चेतनाचेतनानामीश्वरस्य च संबन्धरूपशरीरात्मभावादयः ॥

(शरीरशरीरिभावनिरूपणम्)

तत्रेश्वरस्य शरीरित्वं नाम—चेतनाचेतनद्रव्यनिरूपितं नियमेन धारकत्वं नियन्तृत्वं शेषित्वं च । चेतनाचेतनानि प्रति धारकत्वं नियन्तृत्वं च नाम—स्वस्य स्वरूपेण संकल्पेन च यथार्हं सत्तास्थितिप्रवृत्तीनां प्रयोजकत्वम् । तत् कथमिति चेत्—ईश्वरः स्वकीयानां स्वरूपनिरूपकधर्माणाम्, निरूपितस्वरूपविशेषणानां गुणानां चैव स्वव्यतिरिक्तसमस्तद्रव्याणामपि

अव्यवधानेन स्वरूपेणाऽऽधारो भवति । तत्तद्द्रव्याश्रितानां गुणादीनां तत्तद्द्रव्यद्वाराऽऽधारो भवति । 'जीवैर्धार्यमाणानां शरीराणां जीवद्वाराऽऽधारो भवति' इति केचिदाहुः । जीवं द्वारीकृत्य, स्वरूपेण च आधारो भवतीति केचिदाचार्या आहुः । इत्थं सर्वेषामीश्वरस्वरूपं प्रति अपृथक्सिद्धविशेषणत्वात् एषां सत्तादीनि आश्रयसत्ताधीनानि । सर्ववस्तूनां सत्तायाः संकल्पाधीनत्वं नाम—अनित्यानामनित्येच्छयोत्पन्नत्वं नित्यानां नित्येच्छासिद्धत्वञ्च । इममर्थम् "[1]इच्छात एव तव विश्वपदार्थसत्ता" इति श्लोके अभियुक्ता विवेचयामासुः । एतेन सर्वस्यापि सत्तानुवृत्तिरूपायाः स्थितेरपीश्वरेच्छाधीनत्वात् सर्वमीश्वरसंकल्पाश्रितमित्युच्यते । गुरुद्रव्याणि संकल्पेन धृतानीति शास्त्रेषु प्रतिपादनम्, "[2]द्यौः सचन्द्रार्कनक्षत्रं खं दिशो भूर्महोदधिः । वासुदेवस्य वीर्येण विधृतानि महात्मनः" इत्युक्तरीत्या तत्तद्देशविशेषेषु पतनप्रसक्तिराहित्येनावस्थापनरूपार्थमभिप्रेत्य । इत्थमिच्छाधीनसत्तास्थितिप्रवृत्तीनां वस्तूनां (विषये) परमात्मस्वरूपं किं करोतीति चेत्—परमात्मन इच्छा इमानि वस्तूनि परमात्मस्वरूपाश्रितत्वेन विविच्य स्थापयति । इत्थं सर्वं वस्तु ईश्वरस्वरूपाश्रितमीश्वरेच्छाधीनं च भवति ।

लोकेऽपि शरीरं शरीरिणः स्वरूपाश्रितं संकल्पाधीनं च सत् पश्यामः—जीवाधिष्ठानकालेऽवस्थानात् एतत्त्यक्ततादशायां विनाशाच्च स्वरूपाश्रितम् । अयमर्थः संकल्परहितसुषुप्त्याद्यवस्थासु विशदः । जागरादिदशासु संकल्पेन पतनप्रतिबन्धार्हं धारणसमये

संकल्पाश्रितमिति वक्तव्यम् । अत्र स्वरूपाश्रितत्वम् आधेयत्वमिति संकल्पाश्रितत्वम् नियाम्यत्वमिति च वदति(प्रपाणगण:) ।

(ईश्वरस्य सर्वशेषित्वनिरूपणम्)

ईश्वरस्य सर्वशेषित्वं नाम—"[3]उपादत्ते सत्तास्थिति-नियमनाद्यैश्चिदचितौ स्वमुद्दिश्य श्रीमानिति वदति वागौपनिषदी । उपायोपेयत्वे तदिह तव तत्त्वं न तु गुणौ अतस्त्वां श्रीरङ्गेशय ! शरणमव्याजमभजम् ॥" इत्युक्तरीत्या स्वप्रयोजनार्थमेव पारार्थ्यैक-स्वभावानामेषामुपादानपूर्वकमेतज्जन्यातिशयभाक्त्वम् ।

(आधाराधेयभावादिफलितार्थनिरूपणम्)

एभिराधाराधेयभावादिभिरस्य चेतनस्य किं फलतीति चेत्—आधाराधेयभावेन तदीयज्ञानशक्त्यादीनामिवापृथक्-सिद्धस्वरूपलाभः, शेषशेषिभावेन आत्माभिमानानुगुण-पुरुषार्थव्यवस्थानुसारेण स्वरूपानुरूपपुरुषार्थरुचिः, शेषशेषि-भावेन नियन्तृनियाम्यभावेन च स्वरूपानुरूपपुरुषार्थानुरूप-निरपेक्षोपायविशेषावगमश्च फलति । तदेभिरयं चेतनोऽनन्याधारोऽनन्य-प्रयोजनोऽनन्यशरणश्चेति सिद्धम् ।

(रहस्यत्रयेऽनन्याधारत्वाद्यनुसंधानस्थलप्रदर्शनम्)

अस्यार्थस्य प्रथमरहस्ये स्थितत्वं कथमिति चेत्—नारायणशब्दे तत्पुरुषबहुव्रीहिसमासद्वयसिद्धधारकत्वव्या-पकत्वादिभिरनन्याधारत्वादिविशिष्टस्वरूपलाभः । पारार्थ्य-पारतन्त्र्यगर्भप्राक्तनपदद्वयेन अनन्यप्रयोजनत्वमनन्यशरणत्वं च

फलति । प्रपत्त्यनुष्ठानप्रकाशके मन्त्ररत्ने पूर्वखण्डेनानन्यशरणत्व-मुत्तरखण्डेनानन्यप्रयोजनत्वं भागद्वयेनानन्याधारत्वं च प्रकाश्यते । एवं शाब्दतया आर्थतया च चरमश्लोकेऽप्ययं विभागो द्रष्टव्य. ।

एवं चरमश्लोके सिद्धोपायवशीकरणार्थविहितस्य साध्योपायविशेषस्य द्वयेनानुष्ठानसमयेऽनुसन्धेयतयाऽवश्या-पेक्षितान् सर्वान् अर्थान्, अस्थूलदर्पण इव स्थूलपदार्थान्, संग्रहेण विशदं प्रकाशयति श्रीमन्त्रः ॥

(श्रीवादिहंसाम्बुदाचार्योक्तं मन्त्रार्थानुसन्धानस्यानुकूलं निदर्शनम्)

अत्र प्रथमपदोदिता अर्था अर्जुनरथे, "[1]अग्रतः प्रययौ रामः" इति श्लोके च द्रष्टव्याः । द्वितीयपदे शब्दतोऽर्थस्वभावाच्च प्रतीयमानावर्थौ श्रीभरतस्य शत्रुघ्नस्य वृत्तान्तयोर्ज्ञातुं शक्यौ । "अहं त्वां विना नास्मि पश्य नारायण! त्वं मां विना नासि" इत्युक्त-नारायणशब्दार्थः कोसलजनपदस्थजन्तून् चक्रवर्तिश्रीकुमारं चोदा-हरणीकृत्य द्रष्टव्यः । पूर्वपदद्वयप्रतिपन्नकाष्ठाप्राप्तपारार्थ्यपारतन्त्र्य-मूलकं तृतीयपदस्थचतुर्थीविवक्षितं प्रार्थनीयं शेष्यभिमतं कैङ्कर्यं बालस्वामिन[2] एतदवतारभूतपादुकायाश्च प्रवृत्तौ निवृत्तौ च विशदं ज्ञातुं शक्यम् । अयं श्रीमन्त्रार्थानुसन्धानस्योदाहरणतया श्रीवादिहं-साम्बुवाहाचार्यैरनुगृहीत उपायः ॥ अनया रीत्या द्वये चरमश्लोके च निहिता अर्था विशदमनुसन्धेयाः ।

---

1 'नान् उन्नै यन्रि इलेन् कण्डाय् नारणने नी एन्नै यन्रि यिलै' (नान्मुहन्तिरुवन्तादि-7) । 2 लक्ष्मणस्येत्यर्थः ।

(शेषशेषिभावस्य दासस्वामिभावे विश्रमणम्)

अत्रेश्वरे प्रकाशितं शेषित्वं चेतनाचेतनसाधारणधर्मत्वात् चेतनैकान्ते स्वामित्वरूपे विशेषे पर्यवसाय्यानुसन्धातुमुचितम्। एवं स्वगतं शेषत्वमपि सामान्यरूपत्वात् दासत्वरूपे विशेषे विश्रमय्यानुसन्धेयम्। अत्र सामान्यभूतः शेषशेषिभावः प्रथमाक्षरे चतुर्थ्यां प्रकाश्यः। एतद्विशेषौ दासत्वस्वामित्वे द्वयोरपि चेतनत्वेन प्रकाशमानत्वादर्थसिद्धौ। एवं नारायणशब्देपि सामान्यविशेषौ द्रष्टव्यौ।

(दासत्वस्वामित्वफलितार्थनिरूपणम्)

अत्र सामान्यभूतशेषत्वेन चेतनस्य प्राप्तः किञ्चित्कारो दासत्वरूपविशेषेण कैङ्कर्यरूपपुरुषार्थः संपद्यते। एवं शेषित्वप्रयुक्त ईश्वरस्यातिशययोगोऽपि स्वामित्वरूपविशेषेण तस्य पुरुषार्थरूपतया फलति। चेतनरक्षणे ईश्वरस्य प्राप्ततया (स्वतोधिकृततया) शक्ततया च तदधीनप्रवृत्तिकतां विना चेतनानामनधिकृततया अशक्ततया चावस्थितेर्निबन्धनम्, ऐश्वरं निरुपाधिकशेषित्वं निरुपाधिकनियन्तृत्वञ्च, चेतनानां निरुपाधिकशेषत्वं निरुपाधिकनियाम्यत्वं च। स्वामिना स्वीयवस्तुनो रक्षणं समर्थेनासमर्थस्य रक्षणं च प्राप्तं (उचितं) किल। रक्षणसमये कर्मवश्यानामुपायविशेषे प्रवर्तनपूर्वकरक्षणमीश्वरस्य स्वसंकल्पनियतम्॥

(अधिकारार्थसंग्राहकगाथा)

[2](गाथा) स्थितिप्रदःसन् धारकः, नियामकःसन् ईश्वरः, अस्वभूतं न किञ्चिदित्येवं सर्वं स्वकीयमित्यभिमन्ता सन् स्वामी च भवन् निरुपम इत्येवं स्थितो यः, तस्य तुलसीभूषितकिरीटस्य(मौलेः) शरीरभूता वयं मूल्यं(शुल्कं) विनैव दासभूता इति वैदिकाभिमतः तात्त्विकोऽर्थः ॥

(उपसंहारपद्यम्)

यद्येतं यतिसार्वभौमकथितं विद्यादविद्यातमः—
प्रत्यूषं प्रतितन्त्रमन्तिमयुगे कश्चित् विपश्चित्तमः ।
तत्रैकत्र झटित्युपैति विलयं तत्तन्मतस्थापना-
हेवाकप्रथमानहैतुककथाकल्लोलकोलाहलः ॥

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीमद्रहस्यत्रये प्रधानप्रतितन्त्राधिकारः तृतीयः ॥

—०—०—

2 निलै तन्द्धारकनाय् नियमिक्कुमीश्वनुमाय् इलदोन्रिलावहै येल्लां तनदेन्नु मेन्दैयुमाय् तुलैयोन्रिलै येन निन्र तुडाय् मुडियानुडम्बाय् विलैयिन्रि नामडियोमेन्नु वेदियर मेय्पोरुळे ।

श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ अर्थपञ्चकाधिकारः चतुर्थः ॥

आदौ प्राप्यं परममनघं प्राप्तृरूपं च मादौ
इष्टोपायं त्वयननमसोरीप्सितार्थं चतुर्थ्याम् ।
तद्व्याघातं ममकृतिगिरि व्यञ्जयन्तं मनुं तं
तत्प्रायं च द्वयमपि विदन् सम्मतः सर्ववेदी ॥

(अर्थपञ्चकस्वरूपम्)

नारायणादिशब्दविवक्षितं सम्बन्धविशेषं सिद्धान्तस्याऽऽधारं कृत्वा एतदनुबद्धमर्थपञ्चकं केचिद्विचारयांबभूवुः । अनेन संबन्धेन सह, षडर्था इति केचिदनुसंदधिरे । एतत्संबन्धवत् मुमुक्षोर्विशिष्य ज्ञातव्यत्वेन समुचितमर्थपञ्चकं किमिति चेत्—"[1]प्राप्यस्य ब्रह्मणो रूपं प्राप्तुश्च प्रत्यगात्मनः । प्राप्त्युपायं फलं चैव तथा प्राप्तिविरोधि च । वदन्ति सकला वेदाः सेतिहासपुराणकाः ॥" इति प्रतिपादितम् ।

(रहस्यत्रये प्राप्यानुसंधानस्थलप्रदर्शनम्)

एषु प्राप्यस्य ब्रह्मणः स्वरूपं श्रीमन्त्रे प्रथमाक्षरे नारायणशब्दे च, द्वये सविशेषणयोर्नारायणशब्दयोः, चरमश्लोके माम् अहं इति पदयोश्चानुसन्धेयम् ।

(प्राप्यस्वरूपनिरूपक श्रीवैशिष्ट्यादि)

तत्त्वानुसन्धानसमये, "[2]श्रिया सार्धं जगत्पतिः" "[3]एष नारायणः श्रीमान्" "[4]भवान् नारायणो देवः श्रीमाँश्चक्रधरो विभुः" "[5]श्रीवत्सवक्षाः नित्यश्रीः" "[6]विष्णोः श्रीरनपायिनी" "[7]सीतासमक्षं काकुत्स्थमिदं वचनमब्रवीत्", "[8]सीतामुवाचातियशा राघवं च महाव्रतम्", "[9]अलमेषा परित्रातुं राघवात् राक्षसीगणम्", "[10]भवेयं शरणं हि वः", "[11]भवांस्तु सह वैदेह्या", "[12]तया सहाऽऽसीन-मनन्तभोगिनि", "[13]कान्तस्ते पुरुषोत्तमः", "[14]स्वपरिचरणभोगैः श्रीमति प्रीयमाणे", "[15]श्रीमते निर्मलानन्दोदन्वते विष्णवे नमः", "[16]श्रियः कान्तोऽनन्तो वरगुणगणैकास्पदवपुः", "[17]ब्रह्मणि श्रीनिवासे", "[18]श्रियः पतिर्निखिलहेयप्रत्यनीककल्याणैकतान...... अनन्तज्ञानानन्दैकस्वरूपः", "[19]त्वञ्च श्रीदेवी च स्थितौ आश्चर्यम्" "[20]उज्ज्वलाग्रहस्वदलयायां श्रियां त्वयि चैव स्थितयोः", "[21]अलंकारशालिश्रीमहालक्ष्म्या सह त्वाम्", [22]तव श्रीकृपां पङ्कजाङ्गनायाः श्रीकृपां च", "[23]तव तामरसवधूः त्वं च [24]विश्लेष्टुं

---

19 नीयुम् तिरुमहळुं निन्रायाल् (प्रथमान्तादि 86)

20 ओण्तोडियाळ्तिरुमहळुं नीयुमे निलानिर्प (तिरुवाय्-4-9-10)

21 कोलत्तिरुमामहळोडुन्नै ,, (6-93-)

22 निन् तिरुवरुळुं पंकयत्ताळ् तिरुवरुळुम् ,, (9-2-1)

23 उन्तामरैमङ्गैयुम् नीयुम् ,, (9-2-3)

24 अहल किल्लेनिरैयुम् ,, ,, (6-10-10)

न शक्नोमि क्षणमपि" "[25]कार्त्स्न्येन ज्ञानमानन्दः" "[26]अविनश्वरदीपः परिच्छेत्तुमशक्य" इति प्रमाणोक्तरीत्या सर्वप्रकारेण सर्वावस्थायां सहधर्मचारिण्या महादेव्याऽविनाभूतं कृत्स्नानन्दानन्तज्ञानस्वरूपं चानुसन्धेयम् ।

(तस्य हेयप्रत्यनीकत्वम्)

एवं "[27]समस्तहेयरहितं विष्णवाख्यं परमं पदम्" "[28]परः पराणां सकला न यत्र क्लेशादयः सन्ति परावरेशे" इत्युक्तरीत्या हेयप्रत्यनीकतयाऽनुसन्धेयम् ।

(तस्य कल्याणगुणाकरत्वम्)

[29]"तैर्युक्तः श्रूयतां नरः" [30]"तमेवं गुणसंपन्नम्" [31]"ज्येष्ठं श्रेष्ठगुणैर्युक्तम्" '[32]एवं श्रेष्ठगुणैर्युक्तम्" "[33]गुणैर्विरुरुचे रामः" "[34]तमेवंगुणसंपन्नमप्रधृष्यपराक्रमम्" "[35]बहवो नृप ! कल्याणगुणाः पुत्रस्य सन्ति ते" "[36]आनृशंस्यमनुक्रोशः श्रुतं शीलं दमः शमः । राघवं शोभयन्त्येते षड् गुणाः पुरुषोत्तमम् ॥" "[37]विदितः स हि धर्मज्ञः शरणागतवत्सलः" "[38]शरण्यं शरणं च त्वामाहुर्दिव्या महर्षयः" "[39]निवासवृक्षः साधूनामापन्नानां परा गतिः" "[40]तेजोबलैश्वर्यमहावबोधसुवीर्यशक्त्यादिगुणैकराशिः", "[41]सर्वभूतात्मभूतस्य विष्णोः को वेदितुं गुणान्", "[42]यथा रत्नानि जलधेरसंख्येयानि पुत्रक । तथा गुणाश्च देवस्य ह्यसंख्येया हि चक्रिणः ॥", '[43]वर्षायुतैर्यस्य

25　उणर् मुड् नलम् (तिरुवाय्-1-1-2)
26　नन्दाविळक्के अळत्तर्करियाय् (पेरियतिरु-3-8-1)

गुणा न शक्या वक्तुं समेतैरपि सर्वदेवैः," "[44]चतुर्मुखायुर्यदि कोटिवक्त्रो भवेन्नरः क्वापि विशुद्धचेताः। स ते गुणानामयुतैकमंशं वदेन्न वा देववर प्रसीद ॥," "[45]तवानन्तगुणस्यापि षडेव प्रथमे गुणाः। यैस्त्वयेव जगत् कुक्षावन्येऽप्यन्तर्निवेशिताः ॥" "[46]इषुक्षयान्निवर्तन्ते नान्तरिक्षक्षितिक्षयात्। मतिक्षयान्निवर्तन्ते न गोविन्दगुणक्षयात् ॥", "[47]प्रबलपापिनं मां बाधमानैर्गुणैर्युक्त", "[48]उच्छ्रायशून्यमुच्छ्रयदानन्दवान्" इत्युक्तरीत्या **प्राप्यत्वप्रापकत्वोपयुक्तैर्गुणैर्विशिष्टतयाऽनुसन्धेयम् ।**

(तस्य दिव्यविग्रहवत्त्वम्)

"[49]सदैकरूपरूपाय", "[50]नित्यसिद्धे तदाकारे तत्परत्वे च पौष्कर। यस्यास्ति सत्ता हृदये तस्यासौ सन्निधिं व्रजेत् ॥" "[51]समस्ताः शक्तयश्चैता नृप यत्र प्रतिष्ठिताः। तत् विश्वरूपवैरूप्यं रूपमन्यद्धरेर्महत् ॥" "[52]इच्छागृहीताभिमतोरुदेहः" "[53]न भूतसङ्घसंस्थानो देहोऽस्य परमात्मनः" "[54]न तस्य प्राकृता मूर्तिर्मांसमेदोऽस्थिसंभवा" "[55]भुजैश्चतुर्भिः समुपेतमेतद्रूपं विशिष्टं दिवि संस्थितञ्च," "[56]रुक्माभं स्वप्नधीगम्यम्," "[57]तत्रैकस्थं जगत् कृत्स्नम्" "[58]पश्यामि देवांस्तव देव देहे" "[59]अस्त्रभूषणसंस्थानस्वरूपम्" "[60]भूषणास्त्रस्वरूपस्थं यथेदमखिलं जगत्" "[61]तमसः परमो धाता शङ्खचक्रगदाधरः" इत्युक्तरीत्या **सर्वजगदाश्रयाप्राकृत-**

---

47 वलविनैयेनै यीर्हिन्र गुणंगळैयुडैयाय् (तिरुवाय-8-18)
48 उयर्वर उयर्नलमुडैयवन् „ 1-1-1

दिव्यमङ्गलविग्रहविशिष्टतयाऽनुसन्धेयम् ॥ अस्य विग्रहस्य परव्यूहविभवहार्दार्चावताररूपेण पञ्चप्रकारत्वमेतद्गतविशेषाश्च भगवच्छास्त्रसंप्रदायतोऽवगम्यन्ते ॥

(तस्योभयविभूतियुक्तत्वम्)

"[62]विष्णोरेता विभूतयः", "[63]महाविभूतिसंस्थान" "[64]नान्तोऽस्ति मम दिव्यानां विभूतीनां परन्तप" इत्यादीनां संग्रहभूतस्य, "यदण्डमण्डान्तरगोचरं च यत्" इत्यस्य श्लोकस्यानुसारेणानन्तविभूतिविशिष्टतयाऽनुसन्धेयम् । एतद्विविभूत्यन्तर्गताः चेतनाचेतनरूपा उभयविधा अप्यर्थाः लीलार्थतया भोगार्थतया च विभक्ताः सन्ति । आनुकूल्यमात्रे अविशिष्टेऽपि रसवैषम्येण लीलाभोगविभागो यथालोकं द्रष्टव्यः ।

(तस्य लीलारूपजगद्व्यापारवत्त्वम्)

तथैव, "[66]जन्माद्यस्य यतः" "[67]क्रीडा हरेरिदं सर्वम्" "[68]क्रीडतो बालकस्येव", "[69]बालः क्रीडनकैरिव" "[70]हरे विहरसि क्रीडाकन्तुकैरिव जन्तुभिः" "[71]लोकवत्तु लीलाकैवल्यम्" इत्युक्तरीत्या लीलारूपजगद्व्यापारलक्षणकतया चानुसन्धेयम् ॥

(उक्तार्थसंग्रहपूर्वकं प्राप्तृनिरूपणोपक्रमः)

इत्थं लक्ष्मीसहायमपरिमितज्ञानानन्दस्वरूपं हेयप्रत्यनीकं ज्ञानशक्त्याद्यनन्तमंगलगुणविशिष्टं दिव्यमङ्गलविग्रहोपेतं शरीरभूतविभूतिद्वययुक्तं जगत्सृष्ट्यादिव्यापारलीलं सत् प्राप्यं ब्रह्म प्राप्नुवतः प्रत्यगात्मनो बद्धमुक्तनित्यसाधारणं रूपम्, उपायाधिकारिणः स्वस्य साम्प्रतिकमसाधारणं रूपञ्चावगन्तव्यम् ।

(बद्धमुक्तनित्यानां लक्षणानि)

एषु बद्धा नाम—अनादिकर्मप्रवाहेणानुवृत्तसंसाराः ब्रह्मादिस्तम्बपर्यन्तविभागभागिनः क्षेत्रज्ञाः। मुक्ता नाम—शास्त्रचोदितैरुपायविशेषैर्जनितेन भगवत्प्रसादेनात्यन्तनिवृत्तसंसाराः संकोचरहितभगवदनुभवेन निरतिशयानन्दाः स्थिताः। नित्या नाम—ईश्वरवदनादिसिद्धात ज्ञानसंकोचाभावात् "[72]सवयस इव ये नित्यनिर्दोषगन्धाः" इतिरीत्या अस्पृष्टसंसाराः सन्तो नित्यकैङ्कर्यं कुर्वाणाः अनन्तगरुडविष्वक्सेनादयः। एषां सर्वेषां साधारणं रूपमणुत्वज्ञानानन्दामलत्वादिकं भगवच्छेषत्वपारतन्त्र्यादिकञ्च। मुमुक्षोः स्वस्यासाधारणान् ज्ञातव्यान् आकारान् उपोद्घातेऽवोचाम। अग्रेऽपि द्रष्टव्यम्।

(रहस्यत्रये प्राप्तृस्वरूपानुसन्धानस्थलप्रदर्शनम्)

अस्य प्राप्तुः स्वरूपं प्रणवनमस्स्थमकारेषु नारशब्देषु "प्रपद्ये" इत्युत्तमे "व्रज" इति मध्यमे "त्वा" इतिपदे "मा शुचः" इति वाक्ये चानुसन्धेयम्।

(उपायफलस्वरूपानुसंधानस्थलप्रदर्शनम्।)

प्राप्त्युपायमेतत्परिकरान् फलस्वरूपं चोपरिष्टात् प्राप्तस्थलेषु विस्तरेण प्रतिपादयिष्यामः। एषूपायः श्रीमन्ते नमसि अयनशब्दे, द्वये पूर्वखण्डे, चरमश्लोके पूर्वार्धे चानुसन्धेयः। फलस्वरूपं चतुर्थ्यन्तपदेषु द्वये नमसि, "सर्वपापेभ्यो मोक्षयिष्यामि" इत्यत्र चानुसन्धेयम्।

(प्राप्तिविरोधिस्वरूपप्रदर्शनम्)

प्राप्तिविरोधी—अविद्याकर्मवासनादिरूपो मोक्षप्रतिबन्धकवर्गः। अत्र प्रधानभूतोऽनादिकालसन्तन्यमानाज्ञातिलङ्घनप्रभवो भगवन्निग्रहः। अयम्—

क्षेत्रज्ञानां ज्ञानसंकोचकरं त्रिगुणात्मकप्रकृतिसंसर्गविशेषमुपजनय्य,—एतत्प्रकृतिपरिणामविशेषैः शरीरेन्द्रियादिभिः सह संयोजनपूर्वकं "[73]दृढं सम्यक् बध्वा बहुकृतपापदृढरज्जुभिः, व्रणरूपमांसादिकमविदितमाच्छाद्य मां अपसरणयोग्यं स्थापितवानसि बहिरेव" इति, "[74]तद्दिने त्वद्दत्तस्य शरीरस्य वर्त्मनि भ्रमामि" इति चोक्तरीत्या देहेन्द्रियादिपरतन्त्रमापाद्य,—तस्यामवस्थायामपि शास्त्रवश्यतानर्हतिर्यगादिदशासु स्थापयित्वा,—शास्त्रयोग्येषु मनुष्यादिजन्मसु बाह्यकुदृष्टिमतैर्व्यामोह्य,—तत्राप्रविष्टानपि "[75]भगवत्स्वरूपतिरोधानकरीं विपरीतज्ञानजननीं स्वविषयायाश्च भोग्यबुद्धेर्जननीम्" इत्युक्तरीत्या मूलप्रकृतिप्रभृतिमोहनपिच्छिकया तत्त्वाज्ञान-विपरीतज्ञान-विषयप्रावण्यान्युपजनय्य,—एतन्मूलकतया "[76]आत्मा व्याकुलो यथा भवेत् तथा पञ्चेन्द्रियपीडाफलमल्पसुखं बहु प्रदर्श्य क्लेशयितुं किं ते साम्प्रतम्" इत्युक्तरीत्या सुखलवार्थमकृत्यकरणादिरूपमा-

---

73 तिण्णमळुन्दक्कट्टिप्पलशेय्विनै वन्कयिट्राल् पुण्णै मरैय वरिन्दु एन्नैप्पोर वैत्ताय् पुरमे (तिरुवाय्-5-15)

74 अन्नाळ् नी तन्द वाक्कैयिन् वळियुळल्वेन् (,, 3-2-1)

76 आवि तिहैक्क ऐवर् कुमैक्कुं शिट्रिन्बम् पावियेनैप्पल नी काट्टिप्पडुप्पायो (,, 6-9-9)

ज्ञातिलङ्घनं कारयित्वा,—"[77]पापं प्रज्ञां नाशयति क्रियमाणं पुनः पुनः। नष्टप्रज्ञः पापमेव पुनरारभते नरः ॥" इत्युक्तरीत्या अग्रेऽपि अपराधपरम्परासु प्रवर्तनपूर्वकं तत्फलतया "[78]क्षिपाम्यजस्रमशुभान्' इत्याद्युक्तरीत्या गर्भजन्मजरामरणनरकादिचक्रपरिवृत्तौ परिभ्रमय्य,—क्षुद्रसुखसाधन-राजस-तामसशास्त्रार्थैः "[79]यक्षरक्षांसि राजसाः। प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः ॥" इत्युक्तरीत्या स्वेन साकमविशेषेण दीर्घशृङ्खलायां बन्धमुपेत्य भ्रमतां क्षेत्रज्ञानां चरणयोर्निपात्य,—तत्प्रत्तजुगुप्सावहक्षुद्रपुरुषार्थैः क्रिमीणामिव कृतार्थतामोहमुपजनय्य, योगप्रवृत्तानामपि क्षुद्रदेवतायोगेषु नामाद्यचेतनोपासनेषु वा प्रवृत्तिमुपजनय्य क्षुद्रफलैर्योगमवनतशिरस्कं (फलितं) कृत्वा,—आत्मप्रवणानामपि प्रकृतिसंसृष्टत्वप्रकृति-वियुक्तत्वरूपविधाद्वयेऽपि ब्रह्मदृष्ट्या वा स्वरूपतो वोपासने प्रवर्तनपूर्वं तादृशचतुर्विधोपासनफलभूताल्पास्वादप्रदानेन पुनरावृत्तिमापाद्य—ब्रह्मात्मकस्वात्मचिन्तनप्रवृत्तानां स्वात्मशरीरकपरमात्मचिन्तन-पराणां चापि अन्तरायभूतेन आत्मानुभवेन वा, अष्टैश्वर्यसिद्धि-भिर्वा, निर्दिष्टाभिषेकदिनस्य राजकुमारस्य कारायां दूरतः शुश्रूषणाय प्रसारितहस्तायाश्चेट्या विषये यथा (यदि) चक्षुःपातो भवेत्, तथा प्रारब्धकर्मफलभूतेषु देहेन्द्रियेषु, तदनुबन्धिपरिग्रहेषु, तन्मूलभोगेषु च आसक्तिजननेन वा अन्यपरतामापाद्य,—

इत्थं बहुभिर्मुखैर्भगवत्प्राप्तेर्विरोधी भवति।

द्वात्रिंशत्पदमितवापीलङ्घनोद्युक्तानां प्रथमपदे पतनस्य[एक]त्रिंशपदे पतनस्य चाविशेषवत् यस्मिन् कस्मिंश्चिदपि **पर्वणि अन्तराये** उपनते अयं **संसारं** तीर्णवान् न भवति । **कर्मयोगादिषु प्रवृत्तस्य** "[80]नेहाभिक्रमनाशोऽस्ति" इत्युक्तरीत्या कृता चितिः शिलाचितिरिति, यस्मिन् कस्मिंश्चिद्दिने **फलसिद्धिर्भवेदे**वेत्युक्तमपि **कल्पान्तर-मन्वन्तर-युगान्तर-जन्मान्तरादिषु** कस्मिन्निति निर्धारयितुमशक्यम् । **आनुकूल्ये**ऽतिशयिते सत्यपि **वसिष्ठादीना**मपि **विलम्बं** पश्यामः । **प्रातिकूल्ये**ऽतिशयिते सत्यपि **वृत्रक्षत्रबन्धुप्रभृतीनां** झटिति **मोक्ष**सिद्धिं पश्यामः । अतो **विलम्बरहितमोक्षहेतवः सुकृतविशेषाः** केषां समीपे सन्तीति ज्ञातुमशक्यम् । **विलम्बहेतोर्निग्रहस्य कारण**भूता **दुष्कर्मविशेषाः** केषां समीपे सन्तीत्यपि ज्ञातुमशक्यम् ।

(ईदृशभगवन्निग्रहपरिहारसाधनम्)

इत्थम**निष्टपरम्परामूल**भूतैरा**ज्ञातिलंघनै**र्जनितस्य **भगवन्निग्रहविशेषरूपस्य प्रधानविरोधिनः** कर्तव्यं परिहारप्रकारं "[81]तस्य च वशीकरणं तच्छरणागतिरेव" इति **वशीकार्यपरम्परानिरूपण**-प्रसङ्गे **श्रीभाष्यकारो**ऽनुजग्राह ।

(**विरोधिवर्गानुसंधानस्थलस्य अनुसंधानप्रयोजनस्य च प्रदर्शनम्**)

इमं **विरोधिवर्गं** सर्वं **रहस्यत्रये** विधीयमानानामर्थानां व्यवच्छेदशक्त्या **नमसोर्थकारोत्तरषष्ठीभ्याम्, सर्वपाप**शब्देन चानुसंधाय **संसारे** [संततसैकतरूपे] चरणसंतापेन पुरुषार्थहेतुभूतमार्गेषु त्वरितुं युक्तम् ॥

(अधिकारार्थसंग्राहकगाथा)

[1](गाथा) पुरुषार्थ एक इति स्थितः पुष्पपुत्रीनाथः, तत्पादौ प्राप्य कृपया एकीभूतो भक्तः, तेन स्वीक्रियमाण उपायः, अनुरूपं फलम्, अज्ञानसंपृक्तकर्मरूपदृढश्रृङ्खलेत्येतान् पञ्च (अर्थान्) जानानाः—तमः किमपि यथा न स्यात् तथा, मन्मनो यथा दृढं स्यात् तथोपदिष्टवन्तः ॥

(उपसंहारपद्यम्)

प्राप्यं ब्रह्म समस्तशेषि परमं प्राप्ताऽहमस्योचितः
प्राप्तिर्दायधनक्रमादिह मम प्राप्ता स्वतः सूरिवत् ।
हन्तैनामतिवृत्तवानहम् अहंमत्या विमत्याश्रयः
सेतुः संप्रति शेषिदम्पतिभरन्यासस्तु मे शिष्यते ॥

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीमद्रहस्यत्रयसारे अर्थपञ्चकाधिकारः चतुर्थः ॥

॥ श्रीमते निगमान्तमहादेशिकाय नमः ॥

—o—o—

पोरुळोत्रेन निन्र पूमहणातन् अवनडि शेर्न्दु अरुळोत्रुमन्बन् अवन् कोळुपायम् अमैन्द पयन् मरुळोत्रिय विनैवल्विलङ्गेनविवैयैन्दरिवार इरुळोन्रिरावहै येन्मनम् तेर इयम्बिनरे ।

श्रीः

॥ तत्त्वत्रयाधिकारः पञ्चमः ॥

प्रकृत्यात्मभ्रान्तिर्गलति चिदचिल्लक्षणधिया
तथा जीवेशैक्यप्रभृतिकलहस्तद्विभजनात् ।
अतो भोक्ता भोग्यं तदुभयनियन्तेति निगमै-
र्विभक्तं नस्तत्त्वत्रयमुपदिशन्त्यक्षतधियः ॥

(तत्त्वत्रयनिरूपणप्रयोजनम्)

संबन्धोऽर्थपञ्चकं चेति षट्स्वर्थेषु ज्ञातव्येषु सत्सु एतदेक-देशभूतं तत्त्वत्रयम्, मुमुक्षुणा विशिष्य ज्ञातव्यमित्युपदिशता-माचार्याणामस्य संप्रदायस्य किं मूलमिति चेत्—अस्य मूलं प्रकृत्यात्मभ्रम-स्वतन्त्रात्मभ्रम - तन्निदानानीश्वरवादरुचिरूपाणां महाविरोधिनां प्रथमतो निरसनस्य प्राप्तत्वमेव । एतदभिप्रेत्यैव भोक्तृभोग्यनियन्तृरूपेण शास्त्रेषु तत्त्वविवेकः क्रियते ।

(तत्त्वत्रयस्वभावनिरूपणम्)

एतन्मध्ये "अचेतना परार्था च नित्या सततविक्रिया । त्रिगुणा कर्मिणां क्षेत्रं प्रकृतेः रूपमुच्यते ॥", "[2]अनादिर्भगवान् कालो नान्तो-ऽस्य द्विज विद्यते", "[3]कलामुहूर्तादिमयश्च कालो न यद्विभूतेः परिणामहेतुः", "[4]ज्ञानानन्दमया लोकाः", "[5]कालं स पचते तत्र

न कालस्तत्र वै प्रभुः ।" इत्यादिषु त्रिगुणकालशुद्धसत्त्वरूपाणां त्रिविधाचेतनानां स्वभावोऽभ्यधायि । "[6]पुमान्न देवो न नरः" "[7]नायं देवो न मर्त्यो वा", "[8]क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते", यद्वै पश्यन्ति सूरयः" इत्यादिभिस्त्रिविधजीवानां प्रकारो व्यवेचि । "[10]सर्वज्ञः सर्वदृक् सर्वशक्तिज्ञानबलर्द्धिमान् । क्रमतन्द्रीभय-क्रोधकामादिभिरसंयुतः ॥" इत्यादिभिरीश्वरस्वभाव उपदिष्टोऽस्ति ।

(तत्त्वत्रयस्थितिप्रतिपादकपूर्वाचार्यवचनव्याख्या)

अस्येशेशितव्यरूपस्य तत्त्वत्रयस्यावस्थितिप्रकारम्, "[11]स्वाधीनत्रिविधचेतनाचेतनस्वरूपस्थितिप्रवृत्तिभेदम्" इति संगृह्यानुजगृहुः । त्रिविधचेतनेत्युच्यन्ते बद्धा मुक्ता नित्याश्च । त्रिविधाचेतनेति निर्दिश्यन्ते त्रिगुणद्रव्य काल-शुद्धसत्त्वद्रव्याणि । स्वरूपं नाम स्वासाधारणधर्मेण निरूपितं धर्मि । स्थितिर्नाम-एतस्य कालान्तरानुवृत्तिः । इयंवनित्यवस्तूनां नित्या वर्तते ; अनित्यवस्तूनामीश्वरसंकल्पानुसारेणाधिककाला न्यूनकाला च वर्तते । अत्र प्रवृत्तिर्नाम प्रवृत्तिनिवृत्तिरूपो व्यापारः । इदं सर्वं प्रतिवस्तु प्रमाणप्रतिनियतं वर्तते । प्रमाणानि वस्तुप्रदर्शनकाले तत्तद्वस्तूनां स्वरूपं स्वरूपनिरूपकधर्मान् निरूपितस्वरूपविशेषणानि व्यापारांश्च प्रदर्शयन्ति । तस्य तत्र स्वरूपं स्वरूपनिरूपकधर्मैर्विशिष्टमेव प्रदर्शयन्ति । स्वरूपस्य प्रतिपादनावसरे तत्तद्धर्मापुरस्कारेण प्रतिपादनमशक्यम् । तान् परिहृत्य दर्शने शशविषाणतुल्यं भवति ।

(जीवस्वरूपादिनिरूपणम्)

अतो जीवस्वरूपं ज्ञानत्वानन्दत्वामलत्वाणुत्वादिभिर्निरूपकधर्मैर्निरूप्य ज्ञानमानन्दोऽमलमणु इत्येवंप्रकारैः व्यवहर्तव्यं भवति। इदं जीवतत्त्वं सर्वेश्वरस्य शेषभूतमेव वर्तते इति, तस्यैव निरुपाधिकशेषमिति चायोगान्ययोगव्यवच्छेदाभ्यां प्रतिपन्नस्य शेषत्वस्य सम्बन्धरूपत्वात् सम्बन्धिस्वरूपनिरूपणमन्तरा ज्ञातुमशक्यत्वात् जीवस्येदं निरूपितस्वरूपविशेषणमिति सुवचम्। अणुत्वे सति चेतनत्वमिव स्वतःशेषत्वे सति चेतनत्वमपि जीवलक्षणं भवितुमर्हतीति हेतोरिदं शेषत्वं जीवस्य स्वरूपनिरूपकमित्यपि कथनार्हम्। इत्थं विभुत्वे सति चेतनत्वम्, अनन्याधीनत्वनिरुपाधिकशेषित्वादीनि चेश्वरलक्षणानि। जीवेश्वररूपस्यात्मवर्गस्य सर्वस्यापि साधारणं लक्षणं चेतनत्वं प्रत्यक्त्वं च। चेतनत्वं नाम—ज्ञानाश्रयत्वम्। प्रत्यक्त्वं नाम—स्वस्मै स्वयंप्रकाशमानत्वम्। तदा धर्मभूतज्ञाननैरपेक्ष्येण "अहम्" इति प्रकाशते। इत्थं चेतनत्वादीनामीश्वरजीवसाधारणत्वादीश्वराद् व्यावृत्तिं प्रत्याययितुं जीवलक्षणे स्वतश्शेषत्वादीनि निवेश्यन्ते। प्रथमाक्षरे चतुर्थीप्रतिपन्नस्य तादर्थ्यस्योपाध्यभावात् सर्वरक्षकस्य श्रियः पत्युर्जीवात्मा निरुपाधिकशेष एव भवतीत्येवं यावत्स्वरूपं संबन्धस्य प्रतिपादनमयोगव्यवच्छेदः। मध्यमाक्षरे अवधारणसामर्थ्येन "तस्यैव निरुपाधिकशेषः; अन्यस्य कस्यापि निरुपाधिकशेषो न" इति प्रतिपादनमन्ययोगव्यवच्छेदः। अस्य शेषत्वस्य भागवतशेषत्वपर्यन्ततयाऽभिवृद्धेः प्रकारमग्रे वक्ष्यामः।

एवंभूतानां चेतनानां प्रवृत्तिर्नाम—पराधीनं परार्थं च कर्तृत्वं भोक्तृत्वं च। ईश्वरेण स्वस्य भोक्तृत्वार्थमेषां कर्तृत्व-भोक्तृत्वयोरुत्पादनादिमे परार्थे।

(त्रिविधचेतनानां प्रत्येकं स्वरूपस्थितिप्रवृत्तिषु भेदनिरूपणम्)

बद्धचेतनानामितरेभ्यो भेदः अविद्याकर्मवासनारुचिप्रकृति-संबन्धयुक्तत्वम्। एषामन्योन्यं वर्तमानो ज्ञानसुखादिभेदो ब्रह्मादिस्तम्बपर्यन्तेषु विभागेषु द्रष्टव्यः। इमे बद्धचेतनाः स्वस्य-स्वस्य कर्मानुरूपमीश्वरेणार्पितानि शरीराणि धर्मिस्वरूपेण धर्मभूतज्ञानेन च धारयन्ति। धर्मिनिबन्धनं धारणं शरीरसत्तायाः प्रयोजकं भवति। जाग्रदाद्यवस्थायां धर्मभूतज्ञानेन संपद्यमानं शरीरधारणं पुरुषार्थतदुपायानुष्ठानानाम्, कृतोपायस्य परमैकान्तिनो भगवदनुभवकैङ्कर्याणां चोपयुक्तं भवति। पापकृतामिदं शरीरधारणं विपरीतफलस्य हेतुर्भवति। इमे जीवाः इमानि शरीराणि त्यजेयुश्चेत्—एषां सङ्घातो विशीर्यत एव। शरीरोपादानभूतानि द्रव्याणि ईश्वरशरीररूपेण तिष्ठन्ति।

बद्धचेतनानामितरेभ्यः स्थितिभेदः संसारबन्धस्य याव-न्मोक्षमनुवृत्तिः। प्रवृत्तिभेदः पुण्यपापानुभयरूपास्त्रिविधप्रवृत्तयः।

मुक्तानामितरेभ्यो भेदः प्रतिबन्धकनिवृत्त्याऽऽविर्भूतस्व-रूपत्वम्। स्थितिभेदः पूर्वावधिमत आविर्भावस्योत्तरावधि-राहित्येनावस्थानम्। एषामन्योन्यं स्थितिभेदः आविर्भावे पूर्वभाव-परभावकृते पूर्वावधेराधिक्यन्यूनत्वे। प्रवृत्तिभेदोऽनादिकालप्रहीण-प्रतिलब्धपरिपूर्णभगवदनुभवजनितप्रीतिकारित-यथाभिमत-कैङ्कर्यविशेषाः।

नित्यानामितरेभ्यो भेदोऽनाद्याविर्भूतस्वरूपत्वे सति पारतन्त्र्यम्। एषामितरेभ्यः स्थितिभेदोऽनाद्यनुवृत्तः शेषितत्त्वानुभवः। अयं नित्यानां सर्वेषामविशिष्ट इति एषामन्योन्यं स्थितौ न वैषम्यम्। प्रवृत्तिभेदोऽनादिप्रवाहनित्याः कैङ्कर्यविशेषाः।

(मुक्तानां नित्यानां च सर्वविधकैङ्कर्यसिद्धेरुपपादनम्)

अनन्तगरुडादीनामधिकारविशेषेषु तदुचितकैङ्कर्येषु च व्यवस्थितेषु सत्सु नित्यानां मुक्तानां च सर्वविधकैङ्कर्यसिद्धिर्भवतीत्ययमर्थः कथं घटेतेति चेत्—(1)स्वाम्यभिप्रायानुसारेण स्वस्याभिमतेषु कैङ्कर्येषु दुर्लभस्य कस्याप्यभावात्, (2)एकैककार्यत्वेन व्यवस्थितेषु कैङ्कर्येषु स्वानुष्ठेयत्वाभिसन्धेः परेष्वनुदयात्, (3)येन केनाप्यनुष्ठीयमानस्यापि स्वामिप्रियत्वेन तदुचितकैङ्कर्याणां सर्वप्रियत्वेन कैङ्कर्यफले प्रीतौ विशेषाभावाच्च सर्वेषां सर्वविधकैङ्कर्यसिद्धिर्भवतीत्यर्थे न कश्चिद्विरोधः॥

(धर्मभूतज्ञाननिरूपणम्)

एषामात्मनां सर्वेषां धर्मिस्वरूपवत् धर्मभूतज्ञानेऽपि द्रव्यात्मके सति तत्स्वरूपस्यात्र पार्थक्येनानुपादानं चेतनशब्दोपात्ते विशिष्टे विशेषणतयाऽन्तर्भावनिबन्धनम्।

इदं धर्मभूतज्ञानं विषयप्रकाशनदशायां स्वाश्रयाय स्वयम्प्रकाशं भवति। इदमीश्वरस्य नित्यानां च नित्यविभु; अन्येषां संसारावस्थायां कर्मानुरूपबहुविधसंकोचविकासयुक्तं मुक्तावस्थायामेकविकासेन परस्तात् यावत्कालं विभु भवति।

अस्य प्रवृत्तिस्तावत् विषयाणां प्रकाशनम्, प्रयत्नावस्थायां शरीरादीनां प्रेरणम्, बद्धदशायां संकोचविकासौ, आनुकूल्यप्रातिकूल्यप्रकाशमुखेन भोगरूपावस्थावत्त्वं च। भोगो नाम— स्वस्यानुकूलतया प्रतिकूलतया वा कस्यचिदर्थस्यानुभवनम्।

ईश्वरविभूतिभूतानां सर्वेषां वस्तूनां आनुकूल्ये स्वाभाविके सति, एवमीश्वरे नित्येषु मुक्तेषु चानुभवत्सु सत्सु, संसारिणां कालभेदेन पुरुषभेदेन देशभेदेन च अल्पानुकूल्यं प्रातिकूल्यमौदासीन्यमित्येते विभागाः सर्वेऽप्येषां वस्तूनां न स्वभावसिद्धाः भवन्ति; किंतु एतदीयकर्मानुसारेण सत्यसंकल्पेनेश्वरेण एषां विषये कृताः फलदानप्रकाराः।

(कर्मफलानुभवौपयिकयोग्यतानिरूपणम्)

एतत्कर्मफलानुभवविषये बद्धानां स्वरूपयोग्यता सहकारियोग्यता च स्तः। स्वरूपयोग्यता परतन्त्रचेतनत्वम्। सहकारियोग्यता सापराधत्वम्। नित्यानां मुक्तानां च परतन्त्रचेतनत्वात् स्वरूपयोग्यतासत्त्वेऽपि ईश्वरानभिमतविपरीतानुष्ठानाभावात् सहकारियोग्यता नास्ति। ईश्वरस्य सर्वप्रशासितृतयाऽनन्यशासनीयतया चावस्थानात् परतन्त्रचेतनत्वरूपा स्वरूपयोग्यताऽपि नास्ति; स्वतन्त्राज्ञातिलङ्घनरूपा सहकारियोग्यता च नास्ति।

(धर्मधर्मिभूतज्ञानयोरन्तरनिरूपणम्)

जीवेश्वररूपाणामात्मनां सर्वेषामपि स्वरूपं स्वस्मै स्वयंप्रकाशम्। बद्धानामप्यस्य धर्मिस्वरूपप्रकाशस्य न जात्वपि संकोचविकासौ भवतः। सर्वात्मनामपि धर्मभूतज्ञानं विषय-

प्रकाशनवेलायां स्वाश्रयाय स्वयंप्रकाशं भवति। ज्ञानत्वं स्वयंप्रकाशत्वं च धर्मधर्मिणोः साधारणम्। धर्मभूतज्ञानस्य विषयित्वं विशेषः। धर्मिण आत्मस्वरूपस्य प्रत्यक्त्वं विशेषः। ज्ञानत्वं नाम कस्यचित् प्रकाशकत्वम्। तच्च स्वस्य वा परस्य वा यस्य कस्यचिद् व्यवहारानुगुण्यसंपादनम्। स्वयंप्रकाशत्वं नाम—स्वविषयीकारिज्ञानान्तरनैरपेक्ष्येण स्वयमेव प्रकाशमानत्वम्। धर्मभूतज्ञानस्य विषयित्वं नाम स्वव्यतिरिक्तार्थप्रकाशकत्वम्। आत्मनां प्रत्यक्त्वं नाम—स्वस्मै भासमानत्वम्। तच्च स्वप्रकाशं प्रति स्वयं फलित्वेनावस्थानम्। यस्य कस्यचिद्वस्तुनः प्रकाशस्य फलीति सामान्याकार एव स्वप्रकाशस्य स्वयं फलीति विशेष्यमाणः प्रत्यक्त्वं भवति। एतद्विशेषशून्यस्य वस्तुन इदं सामान्यमेतद्व्याप्तं चेतनत्वं च न स्तः।

इमौ धर्मधर्मिणौ द्वावपि स्वयंप्रकाशौ सन्तावपि नित्यत्वादि-धर्मविशेषविशिष्टरूपैर्ज्ञानान्तरवेद्यावपि भवतः। स्वकीयधर्मभूतज्ञानस्य स्वं प्रति ज्ञानान्तरवेद्यत्वसमये प्रसरणभेदमात्राद् ज्ञानान्तर-व्यपदेशः॥

(त्रिविधाचेतननिरूपणम्)

त्रिविधान्यप्यचेतनानि परान् प्रत्येव प्रकाशमानानि भवन्ति। अचेतनत्वं नाम—ज्ञानाश्रयत्वाभावः। परान् प्रत्येव प्रकाशमानत्वं नाम—स्वप्रकाशं प्रति स्वस्य फलित्वाभावः। इदमुभयं धर्मभूत-ज्ञानादीनामपि तुल्यम्। त्रिविधाचेतनत्वेनोपात्तेषु प्रकृतिकालौ जडौ॥

शुद्धसत्त्वद्रव्यमपि जडमिति केचिदाहुः। जडत्वं नाम—स्वयंप्रकाशत्वाभावः। भगवच्छास्त्रादिपरामर्शिनस्तु ज्ञानात्मकत्वस्य शास्त्रसिद्धत्वात् शुद्धसत्त्वद्रव्यं स्वयंप्रकाशमित्याहुः।

(शुद्धसत्त्वस्वयंप्रकाशत्वसमर्थनम्)

इत्थं **स्वयंप्रकाशत्वे,** संसारिणां शास्त्रवेद्यत्वमन्तरैव स्वयं कुतो न प्रकाशत इति चेत्—**सर्वात्मनां स्वरूपस्य धर्मभूतज्ञानस्य** च स्वयंप्रकाशत्वेऽपि **स्वरूपं** स्वस्यैव स्वयंप्रकाशं सत् परेषां **ज्ञानान्तरवेद्यं** यथा भवति, **धर्मभूतज्ञानं स्वाश्रयस्यैव स्वयंप्रकाशं** सत् इतरेषां स्वयंप्रकाशं यथा न भवति, तथाऽस्यापि नियतविषयस्वयंप्रकाशत्वे न विरोधः। "[12]यो वेत्ति युगपत् सर्वं प्रत्यक्षेण सदा स्वतः। तं प्रणम्य हरिं शास्त्रं न्यायतत्त्वं प्रचक्ष्महे॥" इत्युक्तरीत्या **धर्मभूतज्ञानेन सर्वं साक्षात्कुर्वन्तमीश्वरं** प्रति **शुद्धसत्त्वद्रव्यस्य स्वयंप्रकाशता** कथमिति चेत्—एतदीये **धर्मभूतज्ञाने दिव्यात्मस्वरूप**प्रभृतिकं **सर्वं** विषयीकुर्वाणे सत्यपि इदं **दिव्यात्मस्वरूपं** यथा **स्वयंप्रकाशं** भवति, तथेदमपि स्वयंप्रकाशं भवितुमर्हति। अयं प्रकारो नित्यविषयेऽपि तुल्ययः। विषयप्रकाशनकाले एव धर्मभूवज्ञानं स्वाश्रयं प्रत्येव यथा स्वयंप्रकाशं भवति, तथा मुक्तान् प्रति तस्यामवस्थायामस्यापि स्वयंप्रकाशत्वे न विरोधः। **धर्मभूतज्ञानस्य स्वात्मप्रकाशनशक्तिर्विषयप्रकाशाभावकाले कर्मविशेषैर्यथा प्रतिबद्धा** भवति, तथा **शुद्धसत्त्वद्रव्यस्यापि** स्वात्मप्रकाशनशनक्तिरपि **बद्धदशायां प्रतिबद्धेति** शुद्धसत्त्वं बद्धान् प्रति न प्रकाशते।

धियः स्वयंप्रकाशत्वं मुक्तौ स्वाभाविकं यथा ।
बद्धे कदाचित्संरुद्धं तथाऽत्रापि नियम्यते ॥

इयती अवस्थान्तरापत्तिर्विकारिद्रव्यस्य न विरुध्यते । अतः प्रमाणप्रतिपन्नार्थस्य युक्तिविरोधो वक्तुमशक्यः । एवमनङ्गीकृत्योपचारेण निर्वाहे चिन्त्यमाने, आत्मस्वरूपविषयेऽपि ज्ञानादिशब्दानामुपचारेणान्यपर्यकरणमापद्येत । स्वयंप्रकाशस्य रूपरसादिगुणाः, तन्निबन्धनः पृथिव्यादिविभागः, परिणामादयश्च कथं घटन्त इति चोद्यमपि, धर्मभूतज्ञानधर्मिज्ञानयोर्विद्यमानं वैषम्यं प्रतिबन्दीकृत्य प्रमाणबलेन परिहृतम् । इत्थं स्वयंप्रकाशस्य शुद्धसत्त्वद्रव्यस्य ज्ञातृत्वाभावात् त्रिविधाचेतनेति क्रोडीकारः ॥

(त्रिगुणद्रव्यस्वरूपस्थितिप्रवृत्तिभेदनिरूपणम्)

एषु त्रिगुणद्रव्यस्य स्वरूपभेदो गुणत्रयाश्रयत्वम् । सततपरिणामशीलस्यास्य द्रव्यस्य सत्त्वरजस्तमसामन्योन्यं साम्यापत्तौ महाप्रलयः; वैषम्यावस्थायां सृष्टिस्थिती । गुणवैषम्यवति प्रदेशे महदादयो विकाराः । अत्राविकृतं प्रदेशं विकृतं प्रदेशं च प्रकृतिमहदहंकारतन्मात्रभूतेन्द्रियाणीति चतुर्विंशतितत्त्वात्मना शास्त्राणि विभज्य प्रतिपादयन्ति । कैश्चिद्विवक्षाविशेषैः क्वचित्स्थलेषु तत्त्वानि अधिकतया न्यूनतया च प्रतिपाद्यन्ते । एषु तत्त्वेषु अवान्तरविभागाः, तदभिमानिदेवताश्च तत्तदुपासनाधिकारिभिर्वेदितव्याः । आत्मनस्तेभ्यो व्यावृत्ति ज्ञानमत्रास्माकं प्रधानम् ।

एषां सर्वेषां सर्वेश्वरेऽस्त्रभूषणादिरूपेणावस्थितेः प्रकारः—

[1](गाथा) पुरुषं मणिवरतया, अविनश्यन्तीं मूलप्रकृतिं (श्रीवत्स) लक्ष्मतया, महान्तं गदात्वेन, ज्ञानमज्ञानञ्च खड्गतया कोशतया, (सात्त्विकतामस) अहंकारौ शार्ङ्गशङ्खतया मनः चक्रतया हृषीकपञ्चके द्वे शरतया द्वे भूतमाले वनमालात्वेन (धारयन्) गरुडशरीरभूतानां वेदानामर्थभूतः कृष्णः करिगिरेरुपरि स्थित्वा सर्वं रक्षति— इत्येवंविवेकेन ज्ञातुं युज्यते ।

चतुर्विंशतेस्तत्त्वानामन्योन्यं स्वरूपभेदस्तत्तल्लक्षणैः सिद्धः । तेषु कार्यभूतानां त्रयोविंशतेस्तत्त्वानां एतदारब्धानां च स्थितावुपनमन्त्यौ आधिक्यन्यूनते पुराणप्रसिद्धरीत्या द्रष्टव्ये । "[13]स्वसत्ताभासकं सत्त्वं गुणसत्त्वाद्विलक्षणम्", "[14]तमसः परमो धाता", "[15]अप्राकृतं सुरैर्वन्द्यम्" इत्यादिभिस्तमस उपरिष्टाद्देशविशेषस्य सिद्धेः "[16]अनन्तस्य न तस्यान्तः संख्यानं वाऽपि विद्यते । तदनन्तमसंख्यातप्रमाणं चापि वै यतः" इत्यादीनि नित्यविभूत्यनवच्छिन्नप्रदेशमादाय मूलप्रकृतेरानन्त्यं प्रतिपादयन्ति ।

---

1 पुरुषो मणिवरोऽस्य भवति, प्रकृतिः श्रीवत्सो भवतीत्येवं गरुडतनुभूतवेदप्रतिपाद्यभूतः कृष्ण इति वाऽनुवदितव्यम् ।

1 पुरुडन् मणिवरमाहप्पोन्रामूलप् प्रकृतिमरुवाहमान् तण्डाह, तेरुळ्मारुळ्वाळ्मरैवाह वाङ्गारङ्गळ् शार्ङ्ग शङ्गाह मनम् तिगिरियाह,
इरुडीकङ्गळ् ईरैन्दुम् शरङ्गळाह इरुभूतमालै वनमालैयाह,
गरुडनुरुवामरैयिन् पोरुळाम् कण्णन्
करिगिरिमेल् निन्रनैत्तुं काक्किन्राने ।

त्रिगुणद्रव्यस्य प्रवृत्तिभेदः-बद्धचेतनानां भोगापवर्गार्थमीश्वरस्य लीलारसार्थं च समविषमपरिणामसन्ततिं प्राप्य देहेन्द्रियादिरूपेण तत्तद्व्यापाराणामपि करणम्। इदं रजस्तमोद्वारा बद्धानां तत्त्वयाथात्म्यच्छादनपूर्वं विपरीतज्ञानं जनयति भोगार्थम्। इदमेवापवर्गार्थं सत्त्वविवृद्ध्या तत्वानि यथावत् प्रकाशयति। इदं सर्वमीश्वरस्य लीलारसावहं भवति।

(शुद्धसत्त्वस्य स्वरूपस्थितिप्रवृत्तिभेदनिरूपणम्)

शुद्धसत्वस्य स्वरूपभेदो रजस्तमोगुणामिश्रसत्त्वगुणाश्रयत्वम्। अस्य **स्थितिभेदो** नित्येषु मण्टपगोपुरादिषु, ईश्वरस्य नित्यानां च विग्रहविशेषेषु नित्यो वर्तते। नित्यमुक्तेश्वराणामनित्येच्छासिद्धेषु विग्रहादिष्वनित्यो वर्तते। अस्य **प्रवृत्तिभेदः** एषामिच्छानुरोधिभिः परिणामादिभिः शेषिणो भोगोपकरणतया शेषभूतानां कैङ्कर्योपकरणतया चावस्थानम्।

(कालस्य स्वरूपस्थितिप्रवृत्तिभेदनिरूपणम्)

कालस्य स्वरूपभेदो जडत्वे सति विभुत्वम्। अस्य **स्थितिः** कालावच्छेदाभावान्नित्या भवति। **प्रवृत्तिभेदः** कलाकाष्ठादिविभागेन सृष्ट्यादीनामुपकरणतयाऽवस्थितिप्रकारे द्रष्टव्यः।

(द्रव्याणां नित्यत्वानित्यत्वव्यपदेशतात्पर्यम्)

इमानि द्रव्याणि सर्वाण्यपि **स्वरूपेण नित्यानि** भवन्ति। नामान्तरभजनार्हावस्थाविशेषविशिष्टतां पुरस्कृत्य केषांचिदनित्यतया व्यवहारः। विनष्टसजातीयानामवस्थान्तराणामग्रेऽपि अविच्छेदेनानुवृत्तेः प्रवाहनित्यत्वव्यवहारः॥

(सर्वेषामीश्वराधीनत्वनिरूपणम्)

निरुक्तसर्वपदार्थगतस्वरूपस्थितिप्रवृत्तिभेदानामीश्वराधीनत्वं नाम—ईश्वरसत्तामीश्वरेच्छां च विना एषां सत्ताद्यनर्हत्वम्। अतः समस्तवस्तूनां स्वभावसिद्धानुकूल्यमीश्वरेच्छायत्तम्। अत एव ईश्वरस्य नित्यानां मुक्तानां च सर्वमनुकूलं भवति; बद्धानां कर्मानुरूपं पुरुषभेदेन कालभेदेन चैतेषु प्रातिकूल्यमल्पानुकूल्यं च प्रवर्तते। एषां बद्धानामप्यात्मस्वरूपस्य सर्वदाऽऽनुकूल्यमीश्वरेच्छासिद्धम्। इत्थमनुकूलेनात्मस्वरूपेण सहैकत्वभ्रमात् कर्मवशाच्च किल हेयं शरीरं ज्ञानहीनानामनुकूलं भाति। एषां कर्मोपाधिकप्रातिकूल्यरूपेण मुमुक्षून् प्रति त्याज्यत्वम्; स्वाभाविकानुकूल्यरूपेण मुक्तान् प्रति तेषामेवोपादेयत्वम्। अहंकारममकारयुक्तेन सता स्वार्थं स्वीक्रियमाणानि सर्वाणि प्रतिकूलानि भवन्ति। स्वरूपज्ञानोत्पत्त्युत्तरं स्वामिशेषमिति दर्शने सर्वमनुकूलं भवति। इममर्थं परिपूर्णब्रह्मानुभवाधिकारे विस्तरेण वक्ष्यामः॥

(ईश्वरतत्त्वनिरूपणम्)

इत्थं स्वाधीनसर्वसत्तादिकस्य सत ईश्वरस्य स्वरूपं सत्यत्वादिभिः स्वरूपनिरूपकधर्मैः (युक्ततया) सत्यज्ञानानन्तानन्दामलरूपं भवति। इममर्थम् "[17]अनिर्वाच्यदीप! परिच्छेत्तुमशक्य!" "[18]कृत्स्न

नन्दा विलक्कियलत्तर्करियाय—पेरियतिरु-3-8-1
उणर्मुल्नलं— तिरुवाय्-1-1-2

ज्ञानानन्दः" "[19]अभिव्याप्य तदधिको(मुक्तादधिको)ज्ज्वल-ज्ञानानन्द" "[20]अमलः" इत्यादिभिर्दिव्यसूरयोऽनुसन्दधिरे । इतरे गुणाः दिव्यमङ्गलविग्रहादीनि चेश्वरस्य निरूपितस्वरूपविशेषणानि भवन्ति। एषु गुणेषु ज्ञानशक्तिबलैश्वर्यवीर्यतेजांसि षड् गुणाः परत्वोपयुक्ता भवन्ति । सौशील्यवात्सल्यादयः सौलभ्योपयुक्ता भवन्ति । इमे गुणाः सर्वेऽपि सर्वेष्वपि कालेषु स्वरूपाश्रिताः सन्ति । परव्यूहादिविभागेषु गुणनियमप्रतिपादकानि तु सर्वाण्यपि वचनानि, 'तत्तद्रूपानुसन्धानपराणां विषये सर्वेश्वरेणाविष्क्रियमाणास्ते गुणाः' इत्येतन्मात्रप्रतिपादनार्थानि । प्रत्यौपनिषदविद्याविशेषम् अनुसन्धेया गुणविशेषा यथा नियताः, तथा भगवच्छास्त्रोक्तरूपविशेषानुसंधानस्यापि गुणविशेषा नियताः ॥

तत्र पररूपे ज्ञानादयः षडपि गुणा वेद्याः । व्यूहाश्चत्वार इति त्रय इति च शास्त्राणि प्रतिपादयन्ति । चतुर्षु व्यूहेषु सत्सु, व्यूहवासुदेवरूपे पररूपादनुसन्धेयगुणभेदाभावात् त्रिव्यूहवादः प्रवर्तते । इमं पक्षं "[21]गुणैः षड्भिस्त्वेतैः प्रथमतरमूर्तिस्तव बभौ ततस्तिस्रस्तेषां त्रियुग युगलैर्हि त्रिभिरसु" इति श्लोके संजगृहुः । एषु परव्यूहेषु गुणक्रियाविभागाः—

"[22]षाड्गुण्याद्वासुदेवः पर इति स भवान् मुक्तभोग्यो बलाढ्यात् बोधात् संकर्षणस्त्वं हरसि वितनुषे शास्त्रमैश्वर्यवीर्यात् ।

शूड्डन्ददनिर्पॆरिय शुडर्ज्ञानविन्बम् ,, 10-10-1
अमलं— अमलनादि-1

प्रद्युम्नः सर्गधर्मौ नयसि च भगवन् शक्तितेजोऽनिरुद्धो
बिभ्राणः पासि तत्त्वं गमयसि च तथा व्यूह्य रङ्गाधिराज ॥''

इति श्लोके समग्राहिषत । जाग्रदादिपदभेदगता विशेषाः सर्वेऽपि

'[23]जाग्रत्स्वप्नाद्यलसतुरीयप्रायध्यातृक्रमवदुपास्यः ।
स्वामिन् तत्तद्गुणपरिबर्हश्चातुर्व्यूहं वहसि चतुर्धा ॥''

इति संगृहीता अभवन् । केशवादीनि द्वादश रूपाण्यपि व्यूहान्तराणि ।

विभवा नाम—पद्मनाभादीनि त्रिंशत्संख्यातः किंचिदधिक-संख्यायुक्तानि रूपाणि । एषु मत्स्यकूर्मादयोऽवताराः प्रयोजनविशेषेण केनापि विशिष्य परिगणिताः । एषु विभवेषु ईश्वरस्तत्तत्कार्यविशेषानुगुण्येनापेक्षितानां गुणानां यथाच्छन्दं प्रच्छादनं प्रकाशनं च करोति । एषु अवान्तरभेदाः "[24]कृष्णरूपाण्यसंख्यानि" इत्याद्युक्तरीत्याऽनन्ताः । इत्थमेव विभवान्तराण्यपि द्रष्टव्यानि । कांश्चिज्जीवान् विग्रहविशेषेण शक्तिविशेषेण चाधिष्ठायातिशयितकार्याणां निर्वहणमपि विभवभेदः ।

परव्यूहादिरूपाणामेव आश्रितार्थं तदपेक्षितप्रकारेण "[25]बिम्बाकृत्यात्मना बिम्बे समागत्यावतिष्ठते" इत्युक्तरीत्यावस्थितिरर्चावतारः ।

सर्वेषां हृदयेषु सूक्ष्मभूतरूपविशेषविशिष्टतयाऽवस्थानमन्तर्याम्यवतारः । इदं सर्वान्तर्यामि दिव्यात्मस्वरूपमनुसन्धित्सूनां द्वारमिति "[26]अष्टाङ्गयोगसिद्धानां हृद्यागनिरतात्मनाम् । योगिनामधिकारः स्यादेकस्मिन् हृदयेशये ॥" इत्यादिषु प्रतिपादितमिति अन्तर्यामिरूपमित्युक्तम् । इत्थमवतरद्रूपविधाः सर्वा अपि

शुद्धसत्त्वद्रव्यमय्यः कर्मतत्फलसंबन्धशून्याः प्रवर्तन्ते इत्यतः शुद्धसृष्टित्वेन व्यपदिश्यन्ते ।

(अवताररहस्यनिरूपणम्)

इमेऽवताराः सर्वेऽपि सत्या इति, एष्वीश्वरस्य ज्ञानादिसंकोचो नास्तीति, इमे विग्रहाः शुद्धसत्त्वमया इति, एषामीश्वरेच्छैव कारणमिति, धर्मरक्षणार्थकाल एव काल इति, साधुपरित्राणादीन्येव प्रयोजनानीति इमान् अर्थान् विशदं विज्ञायानुसन्दधानानामेकजन्मन्येव स्वाधिकारानुगुणसमीहितोपायपूर्त्या जन्मान्तरानुभवमन्तरैव मुक्तीभाव इति च, "[27]बहूनि मे व्यतीतानि" इत्यारभ्य पञ्चभिः श्लोकैः गीताचार्योऽनुजग्राह । इदं स्वतन्त्रप्रपत्तिनिष्ठस्य शरण्यगुणविशेषज्ञानमुखेनोपायानुष्ठानक्षणे महाविश्वासादीनि स्थिरीकुर्वत् उपकारकं भवति । एवमेवार्चावतारोऽपि अनायासकरो मोक्षं ददातीत्येतमर्थं "[28]सुरूपां प्रतिमां विष्णोः प्रसन्नवदनेक्षणाम् । कृत्वाऽऽत्मनः प्रीतिकरीं सुवर्णरजतादिभिः ॥ तामर्चयेत् तां प्रणमेत् तां यजेत् तां विचिन्तयेत् । विशत्यपास्तदोषस्तु तामेव ब्रह्मरूपिणीम् ॥" इति भगवान् श्रीशौनकोऽनुजग्राह । दिव्यसूरयोऽपीदमवताररहस्यमर्चावतारवैलक्षण्यं च प्राचुर्येणानुसन्धाय एतन्मूलबलत्वेन परं परत्वं पश्यन्तः स्थिताः ।

एवम्भूतेनेश्वरेण स्वानन्दपरीवाहतया क्रियमाणा व्यापाराः सकलजगत्सृष्टिस्थितिसंहारमोक्षप्रदत्वादयः ॥

(लक्ष्मीतत्त्वनिरूपणम्।)

अयमीश्वरः, "[29]नित्यैवैषा जगन्माता विष्णोः श्रीरनपायिनी" इत्याद्युक्तरीत्या **सर्वावस्थासु सपत्नीक** एव वर्तत इत्ययमर्थः, "[30]तत्त्वेन यः" "[31]माता पिता" इति श्लोकयो**रुपकारविशेषात्** (रातिशयात्) **सादरं विशिष्य** संकीर्तितयोः **पराशरपराङ्कुशयोः प्रबन्धेषु विशदं ज्ञातव्यः**। अत्र **दण्डधरत्वं** पुरुषकारत्वादयश्च सर्वेश्वरस्य लक्ष्म्याश्च भागतया **विभक्ताः व्यापाराः**। "**उपदिश्यमानधर्माधारादतिदिश्यमानधर्माधारस्य विशेषः स्वतःप्राप्तः**" इति मध्यस्थोक्तेरपि एवंभूत**विभाग**निबन्धनवैषम्ये तात्पर्यम्। इदं "[32]युवत्वादौ तुल्येऽपि" इति श्लोके **निर्णीतम्**। "[33]स्वामिनः स्थितिः(तत्त्वं)ज्ञातुमशक्या" इति दिव्यसूरिभि**रनुसंहिते** विषये कश्चिदपि **वृथानिर्बन्धो** न युज्यते। "[34]कृशान् अर्थास्ततः केचिदकृशांस्तत्र कुर्वते" इत्युक्तरीत्या **तर्कपाण्डित्येनाभिमतं** सर्वं साधयितुं **शक्ताः** सन्तोऽपि हि वयं **प्रमाणशरणाः** प्रवर्तामहे। अत एतद् **ईश्वरतत्त्वमीशितव्यतत्त्वानि** च यथाप्रमाणमेव विशदं बोद्धुं साम्प्रतम्। अत्र सार्वज्ञ्यमपि नापेक्ष्यते। **अत्यन्तानुपयुक्तेष्विव स्वल्पोपयुक्तेषु** अभिनिवेशोऽपि न कार्यः। **अपरिच्छेद्ये** समुद्रे नाविकाः मार्गप्रभृतिकमवश्यज्ञेयमर्थं यथा विशदं जानन्ति, तथाऽत्रैतावद्विवेचनमवश्यापेक्षितम्॥ अस्य प्रतिष्ठितत्त्वसिद्ध्यर्थमेतद्विस्तरा अभ्यस्यन्ते।

---

[1]इरैनिलैयुणर्वरिदु— तिरुवाय्-1-3-6

(तत्त्वविभजनवैविध्यप्रयोजनम्)

इत्थं त्रीणि तत्त्वानीति विभज्य चिन्तयतामिव, सर्वविशिष्ट-वेषेणेश्वर एकं तत्त्वमित्यनुसंदधताम्, ईशेशितव्ये, आत्मानात्मानौ उपायोपेयौ इत्येवंरीत्याऽर्थद्वयं ज्ञातव्यतया विभजमानानाम्, रक्ष्यो रक्षको हेयमुपादेयं चेत्येवंप्रकारैरर्थचतुष्टयं ज्ञातव्यत्वेन संगृह्णानानाम्, पूर्वोक्तरीत्याऽर्थपञ्चकमिति अर्थषट्कमिति विवेचयताम्, रहस्यशास्त्रोक्त-रीत्या सप्तपदार्थीचिन्तादिकं कुर्वाणानां च तत्तज्ज्ञानानुष्ठानप्रतिष्ठारूपाः प्रयोजनविशेषा द्रष्टव्याः। "[55]शास्त्रज्ञानं बहुक्लेशं बुद्धेश्चलनकारणम्। उपदेशात् हरिं बुध्वा विरमेत् सर्वकर्मसु ॥" इत्युक्तिः, उपयुक्ततमं सारांशं तूर्णं श्रुत्वा—कृषिमन्तरैव भोक्तुमुपायमुपेयिवान् कृषिचिन्तां यथा त्यजति तथा—विस्तरेणाभ्यसनार्हशास्त्राभ्यासादिकर्मभ्य उपरतेन झटिति मोक्षोपाये प्रवर्तितव्यमित्येतत्परा।

उपयुक्तेषु वैशद्यं त्रिवर्गनिरपेक्षता।
करणत्रयसारूप्यमिति सौख्यरसायनम् ॥

(अधिकारार्थसंग्राहकगाथा)

[1](गाथा) दृढप्रतिष्ठितं यथा स्यात् तथोपदिदिशुः—चिच्चाचिच्च स्वामी चेति विभिन्नानि विस्मयनीयानि तत्त्वानि त्रीणि, कर्ममयदेहे

करवियम्बिनर् चित्तुमचित्तुमिरैयुमेन
वेरुपडुम् वियन् तत्तुवमून्रुम् विनैयुडम्बिल्
करुपडुम् कोडमोहमुंतानिरैयाङ्गुरिप्पुम्
मारनिनैन्दरुलाल् मरैनूल् तन्दवादियरे

भवन् क्रूरमोहः, अहं स्वामीति बुद्धिश्च निवर्तेतामिति विचिन्त्य कृपया वेदशास्त्रप्रदा आद्याः ॥

आवापोद्वापतः स्युः कतिकति कविधीचित्रवत् तत्तदर्थे-
ष्वानन्त्यादस्तिनास्त्योरनवधिकुहनायुक्तिकान्ताः कृतान्ताः ।
तत्त्वालोकस्तु लोप्तुं प्रभवति सहसा निस्समस्तान् समस्तान्
पुंस्त्वे तत्त्वेन दृष्टे पुनरपि न खलु प्राणिता स्थाणुताधीः(दिः)॥

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु श्रीमद्रहस्यत्रयसारे तत्त्वत्रयाधिकारः चतुर्थः ॥

श्रीमते निगमान्तमहादेशिकाय नमः

—०—०—

श्रीः

परदेवतापारमार्थ्याधिकारः

आत्मैक्यं देवतैक्यं त्रिकसमधिगता तुल्यतैक्यं त्रयाणाम्
अन्यत्रैश्वर्यमित्याद्यनिपुणफणितीराद्रियन्ते न सन्तः ।
त्रय्यन्तैरेककण्ठैस्तदनुगुणमनुव्यासमुख्योक्तिभिश्च
श्रीमान्नारायणो नः पतिरखिलतनुर्मुक्तिदो मुक्तभोग्यः ॥

(परदेवतानिर्णयप्रयोजनम्)

उक्तत्रैधर्म्यैः सामान्यतः प्रकृतिपुरुषेश्वरविवेके कृतेऽपि "ओन्रुतेवुम्" ("[1]एकीभवन्त्या देवजातेः") इत्याद्युक्तरीत्या परदेवता-

विशेषनिश्चयस्याभावे "[2]स्मृत्वाऽन्यं कमपि देवं न श्रयेत्(सा)ते विना" इत्युक्तस्य परमैकान्तित्वस्यायोगात्, परमैकान्तिव्यतिरिक्तस्य व्यवधानरहितमोक्षासिद्धेः ईश्वरोऽमुकदेवताविशेष इति निष्कर्षणीयम् ।

(आत्मैक्यदेवतैक्यादिपक्षनिराकरणम्)

तत्र चेतनाचेतनयोरत्यन्तभेदस्य प्रमाणसिद्धत्वात सर्वं परदेवतात्मकब्रह्मद्रव्यमिति पक्षो न घटते । स्वभावसिद्धस्य जीवेश्वरभेदस्य तथा देवादिरूपाणां जीवानामन्योन्यभेदस्य च सुखदुःखादिव्यवस्थया प्रामणिकत्वात्, सर्वान्तर्यामिणि एकत्वे सत्यपि, ब्रह्मरुद्रेन्द्रादिसर्वदेवता ईश्वरेण सह स्वयंमिथश्च अभिन्ना (ऐक्यभाज) इति पक्षो न युज्यते । आसु देवतासु प्रधानत्वेन प्रतिपाद्यमानानां ब्रह्मरुद्रेन्द्रादीनां कार्यत्वकर्मवश्यत्वयोः प्रामाणिकत्वात "[3]आभूतसंप्लवे प्राप्ते प्रलीने प्रकृतौ महान् । एकस्तिष्ठति विश्वात्मा स तु नारायणः प्रभुः ॥", "[4]आद्यो नारायणो देवस्तस्माद्ब्रह्मा ततो भवः ।", "[5]परो नारायणो देवस्तस्माज्जातश्चतुर्मुखः । तस्माद्रुद्रोऽभवद्देवि" इत्यादिषु, "[6]ततस्त्वमपि दुर्धर्षस्तस्माद्भावात् सनातनात । रक्षार्थं सर्वभूतानां विष्णुत्वमुपजग्मिवान् ॥" इत्युक्तरीत्या(यः)स्वेच्छावतीर्णः मूर्तिमध्यस्थो विष्णुनारायणादिशब्दवाच्य(स्स)एव स्वपूर्वावस्थया सर्वस्य जगतः कारणमित्यभिधानात्,

---

ओन्रन्तेवुम— तिरुवाय्-4-10

उन्नित्तु मट्रोरुदेय्वं तोड़ालवनैयल्लाल्—तिरुवाय्-4-6-10

"[7]नित्यं हि नास्ति जगति भूतं स्थावरजङ्गमम् । ऋते तमेकं पुरुषं वासुदेवं सनातनम् ॥" इत्युक्तरीत्या स एव नित्य इत्यभिधानाच्च, तिस्रो मूर्तयः समा इति, तिस्रो मूर्तयः एकतत्त्वमिति, त्रिमूर्त्युत्तीर्ण ईश्वर इति, तिसृषु ब्रह्मा वा रुद्रो वा ईश्वर इति प्रतिपाद्यमानाः साम्यैक्योत्तीर्ण-व्यक्त्यन्तरपक्षाः न घटन्ते ।

(ब्रह्मरुद्रादीनां कार्यत्वकर्मवश्यत्वे)

ब्रह्मरुद्रादयः सर्वेश्वरस्य कार्यभूता इत्येतत्—"[8]तद्विसृष्टः स पुरुषो लोके ब्रह्मेति कीर्त्यते" इत्यादिभिः, "[9]संक्षिप्य च पुरा लोकान् मायया स्वयमेव हि । महार्णवे शयानोऽप्सु मां त्वं पूर्वमजीजनः ॥" "[10]क इति ब्रह्मणो नाम ईशोऽहं सर्वदेहिनाम् । आवां तवाङ्गे संभूतौ तस्मात् केशवनामवान् ॥", "[11]अहं प्रसादजस्तस्य कस्मिंश्चित् कारणान्तरे । त्वं चैव क्रोधजस्तात पूर्वसर्गे सनातने ॥" इति **प्रतिवादिहस्तलिखित** विवादत्यागपत्रनीत्या तेषामेव वचोभिश्च सिद्धम् ।

एते **कर्मवश्याः** सन्तः कैश्चित् कर्मविशेषैः **सर्वेश्वरमाराध्य** स्वस्वपदानि प्रापुरित्येतत–"[12]सर्वे देवा वासुदेवं नमन्ते, "[13]सब्रह्मकाः सरुद्राश्च सेन्द्रा देवा महर्षयः । अर्चयन्ति सुरज्येष्ठं देवं नारायणं हरिम् ॥" "[14]चिन्तयन्तोऽपि यं नित्यं ब्रह्मेशानादयः प्रभुम् । निश्चयं नाधिगच्छन्ति तमस्मि शरणं गतः ॥" "[15]पद्मे दिव्येऽर्कसंकाशे नाभ्यामुत्पाद्य मामपि । प्राजापत्यं त्वया कर्म सर्वं मयि निवेशितम् ॥ सोऽहं संन्यस्तभारो हि त्वामुपासे जगत्पतिम् । "[16]युगकोटिसहस्राणि विष्णुमाराध्य पद्मभूः । पुनस्त्रैलोक्यधातृत्वं प्राप्तवानिति शुश्रुम ॥"

"[17]विश्वरूपो महादेवः सर्वमेधे महाक्रतौ । जुहाव सर्वभूतानि स्वयमात्मानमात्मना ॥ [18]महादेवः सर्वमेधे महात्मा हुत्वाऽऽत्मानं देवदेवो बभूव । विश्वान् लोकान् व्याप्य विष्टभ्य कीर्त्या विराजते द्युतिमान् कृत्तिवासाः ॥" "[19]यो मे यथा कल्पितवान् भागमस्मिन् महाक्रतौ । स तथा यज्ञभागार्हो वेदसूत्रे मया कृतः" **इत्यादिषु प्रसिद्धम्** ॥

(ब्रह्मरुद्रादीनां भगवन्मायापरतन्त्रत्वभगवत्किङ्करत्वे)

एते **भगवन्मायापरतन्त्राः गुणवश्याः ज्ञानसंकोचविकासवन्तश्च** सन्तीत्येतत् **वेदापहारादिवृत्तान्तेषु,** '[20]ब्रह्माद्याः सकला देवा मनुष्याः पशवस्तथा । विष्णुमायामहावर्तगर्तान्धतमसावृताः ॥" "[21]ब्रह्मा विश्वसृजो धर्मो महानव्यक्तमेव च । उत्तमां सात्त्विकीमेतां गतिमाहुर्मनीषिणः ॥" इत्यादिषु च सुव्यक्तम् ॥

एते **स्वेषामन्तरात्मना** तेन प्रत्तानि **ज्ञानादीन्यवलम्ब्य** तस्याऽऽज्ञाकैङ्कर्यं कुर्वन्तीत्येतत् "[22]एतौ द्वौ विबुधश्रेष्ठौ प्रसादक्रोधजौ स्मृतौ । तदादर्शितपन्थानौ सृष्टिसंहारकारकौ" इति प्रत्यपादि ॥

(ब्रह्मरुद्रादीनां शुभाश्रयत्वाभावः)

एषां **शुभाश्रयत्वं नास्तीतीममर्थं** "[23]हिरण्यगर्भो भगवान् वासवोऽथ प्रजापतिः" इत्यारभ्य, "[24]अशुद्धास्ते समस्तास्तु देवाद्याः कर्मयोनयः" इति, "[25]आब्रह्मस्तम्बपर्यन्ता जगदन्तर्व्यवस्थिताः । प्राणिनः कर्मजनितसंसारवशवर्तिनः" इति, '[26]कर्मणां परिपाकत्वादाविरिञ्चादमङ्गलम् । इति मत्वा विरक्तस्य वासुदेवः परा गतिः" **इति च पराशर-शौनक-शुकादयः प्रतिपादयामासुः ॥**

(ब्रह्मरुद्रादीनां भगवदाश्रितत्वं भगवतोऽनन्याश्रितत्वं च)

एषां **भगवान् आश्रयणीय** इत्येतमर्थं **भगवतः** कश्चिदप्याश्रयणीयो नास्तीत्येतमर्थं च '[27]रुद्रं समाश्रिता देवा रुद्रो ब्रह्माणमाश्रितः । ब्रह्मा मामाश्रितो राजन् नाहं कञ्चिदुपाश्रितः । ममाश्रयो न कश्चित् तु सर्वेषामाश्रयो ह्यहम् ॥'' इति स्वयमेवानुजग्राह ॥

(ब्रह्मरुद्रादीनां भगवद्विभूतित्वम्)

इमौ **उभयविभूतिनाथस्य सर्वेश्वरस्य** विभूति**भूता**वित्येतत् ''[28]ब्रह्मा दक्षादयः कालः'' '[29]रुद्रं कालान्तकाद्याश्च'' इतीतरनिर्विशेषं प्रत्यपादि ।

इत्थं वस्त्वन्तरवत् एतावपि **सर्वशरीररिणः सर्वेश्वरस्य प्रकारभूता**वित्येतत् वस्त्वन्तराणामेतयोश्चाविशेषेण नारायणादिशब्दसामानाधि करण्यात् सिद्धम् ।

एतयोः **शरीरतया** तस्या**त्मतया** चावस्थितिं'' [30]तवान्तरात्मा मम च ये चान्ये देहिसंज्ञिताः । सर्वेषां साक्षिभूतोऽसौ न ग्राह्यः केनचित् क्वचित्' इति **ब्रह्मा रुद्रं** प्रति **अवोचत्** ॥

इमौ **शेषभूतौ** स **शेषी**त्येतमर्थं ''[31]दासभूताः स्वतः सर्वे ह्यात्मानः परमात्मनः । अतोऽहमपि ते दास इति मत्वा नमाम्यहम् ॥ इति **मन्त्रराजपदस्तोत्रे सर्वज्ञो रुद्रः** स्वयमेवावोचत् ॥

(भगवतः समाधिकदरिद्रत्वम्)

इत्थं **सर्वैः प्रकारैर्नारायणः समाधिकदरिद्र** इत्येतमर्थं ''[32]**न परं पुण्डरीकाक्षात् दृश्यते पुरुषर्षभ** ।'' ''[33]**परं हि पुण्डरीका-**

क्षान्न भूतं न भविष्यति ॥" "[34]न विष्णोः परमो देवो विद्यते नृपसत्तम ।" "[35]न वासुदेवात् परमस्ति मङ्गलं न वासुदेवात् परमस्ति पावनम् । न वासुदेवात् परमस्ति दैवतं न वासुदेवं प्रणिपत्य सीदति ॥" "[36]त्रैलोक्ये तादृशः कश्चिन्न जातो न जनिष्यते ॥" "[37]न दैवं केशवात् परम्" "[38]राजाधिराजः सर्वेषां विष्णुर्ब्रह्ममयो महान् । ईश्वरं तं विजानीमः स पिता स प्रजापतिः ॥" इत्यादिभिर्बहुधा प्रतिपादयामासुः ॥

(जायमानदशायां भगवत्तदितरवीक्षणे वैलक्षण्यम्)

गर्भेश्रीमन्तो जायमानदशायां रजस्तमःप्रशमहेतुमधुसूदनकटाक्षभाजो मुमुक्षवःस्युरित्येषोऽर्थः, "ब्रह्मरुद्रदृष्टा रजस्तमःपरतन्त्राः स्युरित्येषोऽर्थश्च "[39]जायमानं हि पुरुषं यं पश्येन्मधुसूदनः । सात्त्विकः स तु विज्ञेयः स वै मोक्षार्थचिन्तकः ॥ [40]पश्यत्येनं जायमानं ब्रह्मा रुद्रोऽथवा पुनः । रजसा तमसा चास्य मानसं समभिप्लुतम् ॥" इति व्यभज्यत ॥

(ब्रह्मरुद्रादीनां मुमुक्ष्वनुपास्यत्वम्)

एते मुमुक्षूणामनुपास्या इत्ययमर्थः एषां कारणभूतः सर्वेश्वर एव एषामन्येषाञ्च मुमुक्षूणामुपास्य इत्ययमर्थश्च "[41]संसारार्णवमग्नानां विषयाक्रान्तचेतसाम् । विष्णुपोतं विना नान्यत् किञ्चिदस्ति परायणम् ॥" इति, "[42]ब्रह्माणं शितिकण्ठं च याश्चान्या देवताः स्मृताः । प्रतिबुद्धा न सेवन्ते यस्मात् परिमितं फलम् ॥" इति,

"[43]हरिरेकः सदा ध्येयो भवद्भिः सत्त्वसंस्थितैः । उपास्योऽहं सदा विप्रा उपायोऽस्मि हरेः स्मृतौ ॥" इति च प्रत्यपादि ॥

एतेनैतेषां मोक्षोपकारकत्वस्य प्रतिपादकानि वचनानि आचार्यादिवत् ज्ञानादिहेतुत्वपराणीति निर्णीतं भवति । अयमर्थः, "[44]सूर्यस्यैव तु यो भक्तः सप्तजन्मान्तरं नरः । तस्यैव तु प्रसादेन रुद्रभक्तः प्रजायते ॥ शंकरस्य तु यो भक्तः सप्तजन्मान्तरं नरः । तस्यैव तु प्रसादेन विष्णुभक्तः प्रजायते ॥ वासुदेवस्य यो भक्तः सप्तजन्मान्तरं नरः । तस्यैव तु प्रसादेन वासुदेवे प्रलीयते ॥" इत्यत्रापि विवक्षितः ॥ इत्थं **सूर्यभक्त्यादेः परम्परया भगवद्भक्त्यादावुद्योजकत्वमपि, परावरतत्त्वेषु ऐक्यबुद्धिः व्यत्ययबुद्धिः समत्वबुद्धिरित्येवं** जायमानान् मतिव्यामोहान् आसुरस्वभावात् विषयविशेषे प्रद्वेषादिकं च विनैव, सूर्यादीन् आश्रयतां विषये एवेत्ययमर्थः—"[45]ये तु सामान्यभावेन मन्यन्ते पुरुषोत्तमम् । ते वै पाषण्डिनो ज्ञेयाः सर्वकर्मबहिष्कृताः ॥" इत्यादिषु द्रष्टव्यः । इत्थं **ज्ञानादिष्वन्यथात्वं** प्राप्तवतां **देवतान्तरभक्तौ** सत्यामपि **भगवन्निग्रहेण प्रत्यवाय** एव फलम् । अतः, "[46]त्वं हि रुद्र महाबाहो मोहशास्त्राणि कारय । दर्शयित्वाऽल्पमायासं फलं शीघ्रं प्रदर्शय ॥" इत्युक्तरीत्या मोहनशास्त्रेषु दृष्टफलसिद्धेरुत्पादनमपि तद्द्वारा विमोह्य नरके पातनार्थमेव ।

सत्यसंकल्पे भगवति कंचिन्निग्राह्यतया संकल्पितवति सति; "[47]ब्रह्मा स्वयंभूश्चतुराननो वा रुद्रस्त्रिनेत्रस्त्रिपुरान्तको वा । इन्द्रो

महेन्द्रः सुरनायको वा त्रातुं न शक्ता युधि रामवध्यम् ॥" इत्युक्त्या देवतान्तराणि रक्षितुं नैव शक्तानि ।

(देवैरपि भगवदाश्रितविरोधस्याशक्यत्वम्)

सर्वेषु देवेषु सुग्रीवमहाराजादिवत् स्वान्तरङ्गभूतेष्वपि च स्वाश्रितं कंचित् हिंसितुं संकल्पयत्सु सत्सु, "[48]सकृदेव प्रपन्नाय" इत्युक्तरीत्या सत्यप्रतिज्ञस्वव्रताभंगार्थं रावणादीनिव दुष्प्रकृतीन् निराकार्यान् निराकृत्य श्रीवानरवीरानिवानुकूलयितव्यान् अनुकूलान् संपाद्य च सर्वेश्वरो रक्षति ।

(देवतान्तराणां क्षुद्रफलप्रदत्वस्य भगवदधीनत्वम्)

देवतान्तरसमीपे "[49]काङ्क्षन्तः कर्मणां सिद्धिं यजन्त इह देवताः । क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा इत्युक्तरीत्या विषमधुतुल्यानि क्षुद्रफलानि झटिति सिध्यन्ति । तान्यपि, [50]लभते च ततः कामान् मयैव विहितान् हि तान्" "[51]एष माता पिता चापि युष्माकं च पितामहः । मयाऽनुशिष्टो भविता सर्वभूतवरप्रदः । अस्य चैवानुजो रुद्रो ललाटात् यः समुत्थितः । ब्रह्मानुशिष्टो भविता सर्वभूत(सत्त्व)वरप्रदः" इत्याद्युक्तरीत्या भगवदधीनानि ।

(ब्रह्मरुद्रयोर्विलम्बेनापि मोक्षप्रदानासामर्थ्यम्)

"[52]यस्मात् परिमितं फलम्", "[53]सात्त्विकेषु तु कल्पेषु माहात्म्यमधिकं हरेः । तेष्वेव योगसंसिद्धा गमिष्यन्ति परां गतिम्" इत्युक्ततया तत्सन्निधौ मोक्षो विलम्बेनापि न लभ्यते ।

(भगवतः सर्वफलप्रदत्वम्, अविलम्बेन मोक्षप्रदत्वञ्च)

सर्वेश्वरसन्निधौ, "[54]युगकोटिसहस्राणि विष्णुमाराध्य पद्मभूः। इत्याद्युक्तरीत्या अतिशयितान्यैश्वर्यादीन्यपि लभ्यन्ते। ततः श्रमपरिहारार्थेन गङ्गास्नानेन पापक्षयसिद्धिवत् विषयस्वभावेन आनुषङ्गिके पापक्षये उत्पन्ने रजस्तमसोरभिभवे जाते सत्त्वोन्मेषे संपन्ने जनकाम्बरीषकेकयादीनामिव क्रमेण मोक्षपर्यन्तता भवति। मोक्षोपायनिष्ठताविषये, "[55]बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते", "[56]ये जन्मकोटिभिः सिद्धास्तेषामन्तेऽत्र संस्थितिः।" "[57]जन्मान्तरसहस्रेषु तपोध्यानसमाधिभिः। नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते॥" इत्युक्तरीत्या विलम्बो भवति। मोक्षरुचौ जातायां शक्ये कस्मिंश्चिदुपाये प्रवृत्तौ संपन्नायाम्, "[58]तेषामहं समुद्धर्ता मृत्युसंसारसागरात्। भवामि नचिरात् पार्थ मय्यावेशितचेतसाम्॥" इत्युक्तरीत्या मोक्षसिद्धौ विलम्बो न भवति। स्वतन्त्रप्रपत्तिनिष्ठस्य स्वोद्दिष्ट एवावधिः। अन्यत् विलम्बाविलम्ब-गमकं नास्ति। इमे नियमाः सर्वेऽपि, "[59]स्वातन्त्र्यमैश्वरमपर्यनुयोज्यमाहुः" इत्युक्त्या निरङ्कुशस्वच्छन्दतया सिद्धा इति प्रमाण-परतन्त्राणां सिद्धम्।

(देवतान्तराणां अप्रबुद्धमात्रसेव्यत्वम्)

इमान् अर्थान् इत्थं विशदमप्रबुद्ध्यमानानामेवं देवतान्तराणि सेव्यानीत्ययमर्थः "[60]प्रतिबुद्धवर्जं सेव्यं तु" इति व्यवास्थाप्यत।

(देवतान्तरदत्तफलस्याल्पत्वम्)

इमानि **देवतान्तराणि भगवच्छरीरत्वेनाबुध्वा** आश्रयताम्— **चार्वाकेण** सता केनचित् **सेवकेन** राजशरीरे **चन्दनादौ** प्रयुक्ते सति, राजशरीरे यथाऽऽत्मा **प्रीतो** भवति—तथा **वस्तुगत्या सर्वेश्वरे** आराध्ये सत्यपि, "[61]ये त्वन्यदेवताभक्ता यजन्ते श्रद्धयाऽन्विताः। तेऽपि मामेव कौन्तेय **यजन्त्यविधिपूर्वकम्** ॥" इत्युक्तरीत्या **शास्त्रार्थवैकल्यस्य** जातत्वात् तत्रोक्तं फलमपि विकलं भवति। भगवच्छरीरतां बुद्ध्वा क्षुद्रफलानि झटिति प्राप्तव्यानि इति रागविशेषेण तानि (देवतान्तराणि) उपासीनानां तत्तत्फलानि पूर्णानि भवन्ति।

(भगवद्दत्तफलस्यातिशयितत्वम्)

एवं ज्ञाते सति **भगवन्तमेव** "[62]आर्तो जिज्ञासुरर्थार्थी" इत्युक्तरीत्या **फलान्तरार्थ**मपि समाश्रयेच्चेत्, तानि **फलान्यतिशयितानि** भवन्ति।

(अनन्यप्रयोजनस्याप्यानुषङ्गिकी ऐश्वर्यप्राप्तिः)

अनन्यप्रयोजनतया आश्रयतामपि, "[63]शरीरारोग्यमर्थांश्च भोगांश्चैवाऽऽनुषङ्गिकान्। ददाति ध्यायिनां नित्यमपवर्गप्रदो हरिः ॥" इत्युक्तरीत्या **फलान्तराण्यप्यानुषङ्गिकतया** सिध्यन्ति। इम**मर्थमनुषङ्गसिद्धैश्वर्यः श्रीकुलशेखरस्वाम्य**पि "[64]त्वामेवाभिलष्य महैश्वर्यमनभिलषन्तमेव स्वयमभिलषदैश्वर्यमिव" इत्यनुजग्राह ॥ "[65]**अभि**लषितदुरापा ये पुरा कामभोगा जलधिमिव जलौघास्ते विशन्ति स्वयं नः"

निन्नैये तान् वेण्डि नीळ्शेल्वं वेण्डादान् तन्नैये
तान्वेण्डुम् शेल्वम्बोल्— पेरुमाळतिरु-5-9

इति ईशाण्डान् इत्याख्योऽपि स्वानुगृहीते स्तोत्रे निबबन्ध । इदं विद्याविशेष-रागविशेषादिनियतम् ॥

(उक्तार्थेषु प्रमाणत्वेन दिव्यसूरिश्रीसूक्तीनामुदाहरणम्)

इत्थं सर्वेश्वरस्य ब्रह्मरुद्रादीनां च सिध्यतो विशेषान् "[66]असमत्स्वामिभुक्तवान्तोच्छिष्टदेवव्यतिरिक्ता अपि किं सन्ति" इति, "[67]चतुर्मुखं नारायणः ससर्ज, चतुर्मुखोऽपि द्वारभूतः सन् स्वयं शंकरं ससर्ज" इति, "[68]आदृत्य प्रणमतां ब्रह्मशिवेन्द्रादीनां सर्वेषां नाभीकमलादिकन्द" इति '[69]तीर्थस्य लोकविक्रान्तरक्तचरणयोरुपरि सुन्दरपुष्पदाम समर्प्य तदेव शिवशीर्षे स्वयं दृष्ट्वा पार्थेन सुनिश्चितं तरुणशीतलतुलसीकस्य महत्त्वम्" इति, "[70]दिविषदामीशिता चतुर्मुखो जटामौलिस्वामी च आर्जवेन तत्पादपङ्कजं ध्यात्वा स्तुत्वा संचरन्ति" इति,

---

एम्बेरुमानुण्डुमिऴ्न्द एच्चिल् देवरल्लादार्
तामुळरे— पेरियतिरु-11-6-2

नान्मुकनै नारायणन् पडैत्तान् नान्मुकनुम्
तान्मुकनाय् शङ्करनैत्ताम्पडैत्तान्—नान्मुकन् तिरु-1

मेवि त्तोऴुम् पिरमन् शिवन् इन्दिरनादिक्केल्लाम्
नाबिक्कमलंमुदर्किऴङ्ग—तिरुवाय्-10-10-3

तीर्तनुलगळन्द शेवडिमेल् पून्दामम् शेर्ति अवैये
शिवन्मुडिमेल् तान् कण्डु पार्तन् तेळिन्दोऴिन्द
पैन्दुऴायान् पेरुमै— तिरुवाय्-2-8-6

"वानवर् तम्मैयाळुमवनुम् नान्मुकनुम् शडैमुडियण्णलुम्

"[71]वक्तुं [योग्यतया] स्थितस्य शिवस्य ब्रह्मणोऽन्येषामपि नायकः स एव" इति, "[72]एकवृषभकश्चतुर्मुखश्च त्वां यथा न जानीतस्तथा माहात्म्ययुक्त" इति, "[73]वृषभध्वजो ब्रह्मेन्द्रोऽन्यः कश्चिदप्यस्य जन्मरूपस्य व्याधेरौषधं न जानाना अपि भवन्ति" इति बहुभिः प्रकारैरनुजगृहुः ।

(देवतापारमार्थ्यस्य रहस्यत्रयेऽनुसन्धानस्थलम्)

इदं **देवतापारमार्थ्यं** श्रीमन्त्रे **प्रथमाक्षरे नारायणशब्दे** च, **द्वये सविशेषणयोर्नारायणशब्दयोः, चरमश्लोके** मामहमिति **शब्दयोश्चा**नुसन्धेयम् ।

(देवतापारमार्थ्यज्ञानशून्यस्यानन्यशरणत्वाभावः)

एतद्देवताविशेषनिश्चयशून्यानाम्, "[74]कृष्णात् रक्षकादन्यो रक्षको नास्ति" इति, "[75]निवर्तय दुःखम्, मा वा निवर्तय; निवर्तका-

---

शम्मैयाल्अवन् पादपङ्कयम् शिन्दित्तेत्ति त्तिरिवरे" ,,-3-6-4

पेशानित्र शिवनुक्कुम् पिरमन्तनक्कुम्
पिरर्कुम् नायकनवने— ,, 4-10-4

औरेर्रैविडैयनुम् नान्मुकनुमुन्नै यरियाप्
पेरुमैयोने— पेरियळ्वार्-4-10-4

एरुत्तुक्कोडियुडैयानुम् पिरमनुमिन्दिरनुम्
मर्रुमोरुत्तरुम् इप्पिरवियेन्नुम् नोय्क्कु
मरुन्दरिवारुमिल्लै— 5-3-6

कण्णन् कण्णल्लादिल्लै योर्कण्णे—तिरुवाय्-2-2-1

कलैवाय् तुन्बङ्कलैयादोड़िवाय् कलैकण्मर्रिलेन्—,, 5-8-8

न्तरशून्योऽहम्" इति "[76]प्राणस्यैकामवलम्बनशाखां त्वां विना न जानाम्यहम्" इति "[77]तरुतुयरंतडायेल्" (प्राप्तं दुःखं न निवारयसि चेत्— त्वच्चरणमन्तरा शरणं नास्ति)" इत्युपक्रमकश्रीसूक्तप्रभृतिषु च प्रतिपाद्यमाना **अनन्यशरणत्वावस्था** न सिद्ध्यति।

(परदेवतानिर्णयस्य सांप्रदायिकत्वनिरूपणम्)

इदं **परदेवतापारमार्थ्यं** श्रीमन्त्रे साक्षात्कृत्य **तदीयपर्यन्ततया देवतान्तरत्यागस्य तदीयपर्यन्ततया भगवच्छेषत्वस्य च प्रतिष्ठितत्वप्रकारम्**, "[78]अन्यत् किमपि दैवमस्तीत्यातिष्ठमानैः सह न संसृज्येय, अङ्गीकृतं च त्वद्दासदास्यम्" इति गाथायां **सर्वेश्वरसन्निधौ सर्वार्थग्राही** दिव्यसूरिरनुजग्राह। अयं "[79]पारुरुविल्लनीरेरिकाल्" (कठिनोर्वी जलमग्निर्वायुः) इति **गाथायां परिशेषक्रमेण विवादविषयान्** त्रीन् स्थापयित्वा तेषु त्रिषु **प्रमाणानुसन्धानेन द्वौ** निरस्य **परिशेषितं परज्योतीरूपमेकं** "मेघसदृशरूपमस्मत्स्वामिनो रूपम्" इति निश्चकर्ष। एतद्रूपविशिष्टः **परमपुरुष** एव **सर्ववेद-प्रतिपाद्यं** परतत्त्वमित्येतमर्थं **सर्ववेदसारभूतप्रणवप्रतिपाद्यतया**

आविकोर्पट्रुक्कोम्बुनित्रलालरिकित्रिलेन् यान्—10-10-3
तरुतुयरन्तडायेल्— पेरुमाळ्-4-1
मट्रुमोर् देय्वमुलदेन्रिरुप्पारोडुट्रिलेन् उट्रुम्
उन्नडियार्कडिमै—पेरियतिरु-8-10-3
पारुरुविल्ल नीरेरिकाल्—तिरुनेडुन्ताण्डहम्-2

"[80]मूलभूतमेकाक्षरं त्रिमात्रोन्मेषगर्भमुच्चार्य समुद्रवर्णं भावयत चेत्" इति महादिव्यसूरिः (श्रीविष्णुचित्तसूरिः) अनुजग्राह ॥

(दिव्यदम्पत्योरेव प्राप्यत्वशरण्यत्वप्रतिपादनम्)

तैत्तिरीये श्रियः पतित्वेन चिह्नेन परमपुरुषस्य व्यावृत्तेराम्नान-प्रकारमनुसंधाय "[71]श्रियमद्राक्षं हिरण्मयविग्रहमद्राक्षम्" इत्युपक्रम्य "[72]शार्वुनमक्कु" (अपाश्रयोऽस्माकम्) इति गाथायाम्, 'प्रतिबुद्धा-नामस्माकं श्रीमहालक्ष्म्या सहावस्थाय (रक्षणे) व्याप्रियमाणमिमं विना **प्राप्यान्तरं शरण्यान्तरं** च नास्ति; इमौ **दम्पती** एव **प्राप्यौ शरण्यौ** च' इति न्यगम्यत ।

(दिव्यदम्पत्योः प्राप्यत्वादौ पराशरपराङ्कुशसूक्तिनिरूपणम्)

इममर्थं "[83]देवतापारमार्थ्यं च यथावद् वेत्स्यते भवान्" "[84]पुलस्त्येन यदुक्तं ते तत् तथैव (सर्वथैतत्) भविष्यति" इति **पुलस्त्यवसिष्ठप्रसादलब्धपरदेवतापारमार्थ्यज्ञानवान्**, श्रीभगवद्या-मुनपादैः "[85]तस्मै नमो मुनिवराय पराशराय" इत्याद्रियमाणः श्रीपराशरब्रह्मर्षिर्विस्तरेण प्रतिपाद्य, '[86]देवतिर्यङ्मनुष्येषु पुंनामा

मूलमागिय ओट्रैयेडुत्तै मून्रमात्तिरै युळ्ळेड़
वाङ्गि वेळैवण्णनै मेवुदिराहिल—पेरियाऴ्वार-4-5-4

1 तिरुक्कण्डेन् पोन्मेनि कण्डेन्—तृतीय अन्तादि-1

2 शार्वु नमक्कु— „ „ 100

भगवान् हरिः । स्त्रीनाम्नी लक्ष्मीर्मैत्रेय नानयोर्विद्यते परम् ॥"
इति परमरहस्ययोग्याय सच्छिष्यायोपदिदेश ।

इममर्थम् अज्ञानराहित्येन ज्ञानभक्ती अनुग्रहेण प्राप्तवान् "आद्यस्य नः कुलपतेः" इत्युक्तरीत्या प्रपन्नजनसंतानकूटस्थः श्रीशठकोपसूरिरपि "[88]उज्ज्वलाग्रहस्तवलयायां श्रियां त्वयि चाधिवसतोर्हृदयं चातुर्यं दृष्ट्वा" इत्यनुजग्राह । अत्र विषये वक्तव्यं सर्वमपि चतुःश्लोकीव्याख्याने परपक्षप्रतिक्षेपपूर्वकं विस्तरेणावोचाम । तत्रैव द्रष्टव्यम् ॥

(अधिकारार्थसंग्राहिका गाथा)

(गाथा) वेदा यथा व्याकुला भवेयुः, साधुजनाः कार्त्स्न्येन यथा कम्पेरन् , तथा वादिनः स्थिरतर्कगर्वेण—पृथक् पृथक् (स स देवः) आदिरिति यथा न वदेयुः, तथा आरण्यकदेशिकाः पुष्पेस्थितया श्रीदेव्या सह स्थितं पुराण[पुरुष]मेव साधयामासुः ।

जनपदभुवनादिस्थानजैत्रासनस्थे-
ष्वनुगतनिजवार्तं नश्वरेष्वीश्वरेषु ।

---

3 ओण्तोडियाळ् तिरुमगलुम् नीयुमे निलानिर्प
कण्डशतिर्कण्डु – तिरुवाय्-4-9-10

4 वादियर् मन्नम् तरुक्कचेरुक्किन् मरै कुलैय
शादुजनङ्गलडङ्ग नडुङ्गत्तनित्तनियै
आदियेनाद्रहै यारणदेशिकर् शार्ठरित्तरनम्
पोदमरुन्तिरुमादुडन् निन्र पुराणनैये-

परिचितनिगमान्तः पश्यति श्रीसहायं
जगति गतिमविद्यादन्तुरे जन्तुरेकः ॥

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु श्रीमद्रहस्यत्रयसारे
परमदेवतापारमार्थ्याधिकारः षष्ठः ॥

श्रीमते निगमान्तमहादेशिकाय नमः

—०—०—

श्रीः

मुमुक्षुत्वाधिकारः

कालावर्तान् प्रकृतिविकृतीः कामभोगेषु दोषान्
ज्वालागर्तप्रतिमदुरितोदर्कदुःखानुभूतिम् ।
याथातथ्यं स्वपरनियतं यच्च दिव्यं पदं तत्
काराकल्पं वपुरपि विदन् कस्तितिक्षेत बन्धम् ॥

इत्थमिमान् अर्थान् अध्यात्मशास्त्रैर्विशदं ज्ञात्वा स्वयंप्रकाशत्व-ज्ञातृत्वकर्तृत्वभोक्तृत्वशरीरित्वाणुत्वनित्यत्वनिरवयत्व - च्छेद-नदहनक्लेदनशोषणाद्यनर्हत्व - वृद्धिह्रासरहितस्वरूपत्वादिभिरात्मनो विशेषणभूतदेहेन्द्रियादिवैलक्षण्यं दृष्ट्वा, अस्य परलोकगमनदेहा-

न्तारप्राप्तियोग्यत्वनिश्चयेन सामान्यतो लोकोत्तीर्णपुरुषार्थयोग्यतामापन्नाः नरकपतनादिजन्मान्तरक्लेशभयात् तत्कारणेभ्यः कर्मभ्यो निवृत्ताः—

आधेयत्वविधेयत्वशेषत्वाल्पशक्तित्वाणुत्व-अज्ञानसंशयविपर्ययदुःखादियोग्यत्व-अशुभाश्रयत्वादितो जातात् विशेष्यभूतेश्वरव्यावृत्तिनिचयात् भगवत्कैङ्कर्यरूपस्वरूपप्राप्तवैभवापेक्षणे योग्यतामापन्नाः—

(श्रीमन्त्रार्थज्ञानेन नानाविधाहंकारममकारनिवृत्तिः)

सर्वापेक्षितार्थसंग्रहभूतश्रीमन्त्रमुखेन सारतमार्थेष्वनुसंधीयमानेषु सत्सु—प्रथमपदे तृतीयाक्षरप्रतिपन्नज्ञानत्वाद्यनुसन्धानेन देहतदनुबन्धिविषयावहंकारममकारौ, प्रथमाक्षरे लुप्तचतुर्थीप्रतिपन्नेन तादर्थ्येन देहातिरिक्तात्मस्वरूपतद्गुणेषु "त्वं मेऽहं मे" इति श्लोकोक्तरीत्या स्वशेषत्वाभिमानरूपावहंकारममकारौ, मध्यमाक्षरेऽवधारणार्थेन "अन्यशेषभूतोऽहम्" इति "ममान्यः शेषी" इति च प्रवर्तमानावहंकारममकारौ, मध्यमपदप्रतिपन्नेन निषेधविशेषेण स्वरक्षणव्यापारविषये प्रवर्तमानौ निरपेक्षस्वातन्त्र्यनिरुपाधिकशेषित्वाभिमानरूपावहंकारममकारौ, एतन्निषेधसामर्थ्येनैव तृतीयपदे चतुर्थ्यभिप्रेते भाविनि कैङ्कर्यपर्यन्तानुभवरूपे फले विषये इदानीन्तनफलान्तरानुभवन्यायेन प्रवर्तमानौ स्वाधीनकर्तृत्वभोक्तृत्वस्वार्थकर्तृत्वभोक्तृत्वभ्रमरूपौ अहंकारममकारौ च यथार्हमार्थविषया शाब्दविषया च समुन्मूल्य इत्थं प्रतिष्ठितज्ञानाः—

(सदोषनिर्दोषफलविवेचनम्)

"[2]अल्पसारभूतान् आस्वाद्य दूरेऽभवम्" '[3]दृष्ट्वा श्रुत्वा स्पृष्ट्वा घ्रात्वा भुक्त्वा संचरद्भिः पञ्चभिरिन्द्रियैर्दृष्टमानन्दम्, ज्ञातुमशक्यं निरवधिकं क्षुद्रानन्दं(च)", "[4]तस्मिन् प्रसन्ने किमिहास्त्यलभ्यं धर्मार्थकामैरलमल्पकास्ते" "[5]अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसाम्", "[6]अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम्" "[7]महाबलान् महावीर्यान् अनन्तधनसंचयान्। गतान् कालेन महता कथाशेषान् नराधिपान्। श्रुत्वा न पुत्रदारादौ गृहक्षेत्रादिकेऽपि वा। द्रव्यादौ वा कृतप्रज्ञो ममत्वं कुरुते नरः॥" '[8]सर्वं दुःखमयं जगत्" "[9]स्वर्गेऽपि पातभीतस्य क्षयिष्णोर्नास्ति निर्वृतिः।" "[10]राज्ये गृध्नन्त्यविद्वांसो ममत्वाहतचेतसः। अहम्मनमाहापानमदमत्ता न मादृशाः॥" "[11]आब्रह्मभवनादेते दोषाः सन्ति महामुने। अत एव हि नेच्छन्ति स्वर्गप्राप्तिं मनीषिणः" "[12]ब्रह्मणः सदनादूर्ध्वं तद्विष्णोः परमं पदम्। शुद्धं सनातनं ज्योतिः परं ब्रह्मेति यद्विदुः॥ न तत्र मूढा गच्छन्ति पुरुषाः विषयात्मकाः। दम्भलोभमदक्रोधद्रोहमोहैरभिद्रुताः॥ निर्ममा निरहंकारा निर्द्वन्द्वाः संयतेन्द्रियाः। ध्यानयोगरताश्चैव तत्र गच्छन्ति साधवः॥" "[13]रम्याणि कामचाराणि विमानानि सभास्तथा।

मुमुक्षुत्वाधिकारः—

अर्पशारङ्गलवैशुवैत्तहन्त्रोड़िन्देन्'—तिरुवाय्-3-2-6

कण्डुकेट्टु उर्टुमोन्दु उण्डु उड़लुमैङ्करुवि

कण्डविन्बम्. तेरिवरिय अळविल्लाच्चिर्टिन्बम्" 4-9-10

आक्रीडा विविधा राजन् पद्मिन्यश्चामलोदकाः ॥" "[14]एते वै निरयास्तात स्थानस्य परमात्मनः ।" इत्यादिप्रमाणैः अल्पत्वास्थिरत्व-दुःखमूलत्वदुःखमिश्रत्वदुःखोदर्कत्वविपरीताभिमानमूलत्वस्वा-भाविकानन्दविरुद्धत्वरूपाचिद्विषयानुभवदोषसप्तकम्, अत्र यथासंभवं घटमानान् चेतनमात्रानुभवदोषांश्च, एतदनुभव-प्रतिकोटिभूतस्य भगवदनुभवस्य वैलक्षण्यं च विशदमनुसन्धाय—

"[15]परमात्मनि यो रक्तो विरक्तोऽपरमात्मनि" इत्युक्ता-मवस्थां प्राप्ताः, "[16]प्रवृत्तिलक्षणं धर्मं प्रजापतिरथाब्रवीत्" इत्युक्तेभ्यः प्रवृत्तिधर्मेभ्यो निवृत्ताः "[17]निवृत्तिलक्षणं धर्मम् ऋषिर्नारायणोऽब्रवीत्" इत्युक्तेषु निवृत्तिधर्मेषु प्रवृत्ता ये, ते मुमुक्षवोऽधिकारिणः॥

(केवलतत्त्वज्ञानस्याफलत्वम् ।)

पूर्वोक्तरीत्या परावरतत्त्वेषु पुरुषार्थेषु सम्यग्ज्ञातेष्वपि इत्थं वैराग्यपूर्वकं परमपुरुषार्थोपायानुष्ठाने चेदप्रवृत्तः, "[18]शीलवृत्तफलं श्रुतम्", "[19]शमार्थं सर्वशास्त्राणि विहितानि मनीषिभिः । तस्मात् स सर्वशास्त्रज्ञो यस्य शान्तं मनस्सदा ॥" इत्युक्तं श्रुतफलमप्यलब्ध्वा, "[20]नाच्छादयति कौपीनं न दंशमशकापहम् । शुनः पुच्छमिवानर्थं पाण्डित्यं धर्मवर्जितम्" इत्येवं हास्यो भवति ।

अतः, "[21]वयसः कर्मणोऽर्थस्य श्रुतस्याभिजनस्य च । वेषवाग्वृत्तिसारूप्यमाचरन् विचरेदिह" इत्युक्तरीत्या श्रुतानुरूपे स्वोचिते परमपुरुषार्थोपायानुष्ठाने त्वरमाणाः "[22](सति) स्वं कर्म

कुर्वाणे परेऽभिनन्दन्ति" इत्युक्तरीत्या "[23]तं देवा ब्राह्मणं विदुः" "[24]प्रणमन्ति देवताः" "इत्यादिषु प्रतिपाद्यमानं समुत्कर्षं प्राप्नुयुः ॥

(अधिकारार्थसंग्राहकगाथा)

(गाथा)—(श्रिया) स्थितपुराण(पुरुष)पादद्वन्द्वोत्तंसनरूपं नित्य-फलम्, नाश एव स्वभाव इति कथनार्हतया जृम्भमाणं भवसमुद्रम्, सदिदं दुष्टमिदमित्युपदिष्टवतां समीचीनकृपया जित्वेन्द्रियाणि मोक्षमेवापेक्षेत महाफलम् ॥

विषमधु बहिष्कुर्वन् धीरो बहिर्विषयात्मकं
परिमितरसस्वात्मप्राप्तिप्रयासपराङ्मुखः ।
निरवधिमहानन्दब्रह्मानुभूतिकुतूहली
जगति भविता दैवात् कश्चिज्जिहासितसंसृतिः ॥

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीमद्रहस्यत्रयसारे मुमुक्षुत्वाधिकारः सप्तमः ॥

श्रीमते निगमान्तमहादेशिकाय नमः

—०—०—

1 नित्त्रपुराणनडियिणैयेन्दु नेडुम्पयनुम् पोन्रुदले निलैयि-त्तिडप् पोडंगुपवकडलुम् नन्रिदु तीयदिदेन्रुनवित्तवर् नल्लरुळाल् अन्रुपयन् तरुमारुमरिन्दवर् अन्दणरे ॥

श्रीः

॥ अधिकारिविभागाधिकारः ॥

मुमुक्षुत्वे तुल्ये सति च मधुविद्यादिषु यथा
व्यवस्था संसिध्यत्यधिकृतिविशेषेण विदुषाम् ।
विकल्प्येत न्यासे स्थितिरितरविद्यासु च तथा
नियत्या वैयात्यं नियमयितुमेवं प्रभवति ॥

(अधिकारिद्वैविध्यम्)

इत्थं परमपुरुषार्थोपायेषु निवृत्तिधर्मेषु प्रवृत्तावधिकारिणौ द्वौ, अद्वारकप्रपत्तिनिष्ठः सद्वारकप्रपत्तिनिष्ठश्चेति ।

स्वतन्त्राङ्गप्रपत्तिभ्यां प्रपन्नावत्र तावुभौ ।
फलसाधनभक्तिभ्यां भक्तावपि च दर्शितौ ॥

(उक्तिनिष्ठाचार्यनिष्ठयोः प्रपत्त्यन्तर्भावः)

"[1]स्नानं सप्तविधं स्मृतम्" इत्युक्तरीत्या यथाधिकारं मान्त्रमानसदिव्यवायव्यादयोऽपि यथा तुल्यफलाः स्नानभेदाः, एवमुक्तिराचार्यनिष्ठेति द्वे अपि प्रपत्तेर्मुखभेदौ ।

(उक्तिनिष्ठा)

अत्रोक्तिर्नाम—आनुकूल्यसंकल्पाद्यङ्गेषु ज्ञानवैशद्यरहितैः तं विनोपायान्तरशून्यतयाऽवस्थितिरूपमधिकारम्, अपेक्षायां कृतायां रक्षेदिति विश्वासं च वहद्भिः, शरण्यविदितत्वात् पूर्णप्रपत्तिगर्भेण आचार्योपदिष्टवाक्येन—धात्युक्तं वाक्यमुक्त्वा सार्वभौमं शरणं

गच्छद्भिर्मुग्धैः, सामन्तकुमारैरिव 'मद्रक्षा त्वदेकभरत्वेन स्वीकर्तव्या' इति प्रार्थनम् । पदवाक्यादिवृत्तान्तानभिज्ञेन बालेन जातु, "भवति भिक्षां देहि" इत्युक्ते सति आढ्यानां सतां गृहेषु तदेवापेक्षितसिद्धिर्यथा भवति—तथा, "[2]ग्रहणेऽपि न्यूनताहीनोऽपेक्षितं सर्वं ददत्" इत्युक्तस्वभावस्य परिपूर्णपरमोदारस्य विषयेऽस्याः उक्तेरपि फलाविनाभावो भवति । ज्ञानहीनानामिदमुक्तिमात्रमवलम्बमानानां विषये, "[3]येन केनापि प्रकारेण द्वयवक्ता त्वम्" इत्युक्तरीत्या इदमुक्तिमात्रमपि न जरयेत् शरण्यस्य कृपा । इममर्थं "[4]पापीयसोऽपि शरणागतिशब्दभाजः" इति, "[5]शरणवरणवागियं योदिता न भवति बत साऽपि धीपूर्विका" इति, "[6]प्रपत्तिवाचैव निरीक्षितुं वृणे" इति चाभियुक्ता आचचक्षिरे । अस्योक्तिमात्रनिष्ठस्य, आचार्यनिष्ठस्य च स्थिती द्वे अपि "[7]तव भरोऽहमकारिषि धार्मिकैः शरणमित्यपि वाचमुदैरिरम् । इति ससाक्षिकयन्निदमद्य मां कुरु भरं तव रङ्गधुरन्धर ॥" इति समुच्चित्यानुसंदधिरे । अत्राधिवयद्योतकेन अपिशब्देन एकैकमेव पर्याप्तमिति सूचितं भवति ।

(आचार्यनिष्ठा)

अनयोराचार्यनिष्ठः, "[8]पुत्रः प्रेष्यस्तथा शिष्य इत्येवं च निवेदयेत्" इति शाण्डिल्यस्मृत्याद्युक्तरीत्या आचार्यकृते आत्मात्मीयभरसमर्पणे स्वयमप्यन्तर्भूतः । "[9]सिद्धिर्भवति वा नेति संशयोऽच्युतसेविनाम् । न संशयोऽत्र तद्भक्तपरिचर्यारतात्मनाम्" इत्युक्तन्यायेन

1 कोळ्ळक्कुरैविलन् वेण्डिर्ड्रेल्लां तरुम् तिरुवाय्-4-9-5

आचार्यनिष्ठस्य कैमुतिकन्यायेन फलसिद्धौ न सन्देहः। "एकस्मात् गिरेर्गिर्यन्तरं धावतः सिंहस्य शरीरे जन्तव इव भाष्यकारे संसारं लङ्घयति सति तत्सहजसंबन्धात् वयमपि उत्तीर्णा भविष्यामः" इति दाशरथिनाम्नः स्वामिनो (मुदलियाण्डान्) वाणी।

"[10]अन्धोऽनन्धग्रहणवशगो याति रङ्गेश यद्वत्
पङ्गुर्नौकाकुहरनिहितो नीयते नाविकेन।
भुङ्क्ते भोगान् अविदितनृपः सेवकस्यार्भकादिः—
त्वत्संप्राप्तौ प्रभवति तथा देशिको मे दयालुः॥"

इति **न्यासतिलके**ऽवोचाम। येन केनापि वा प्रकारेण भवतु; येन केनापि च पुंसाऽनुष्ठिता भवतु; प्रपत्तिं विना तु सर्वेश्वरः परमपुरुषार्थदानार्थं न दयेतेति सिद्धम्॥

(भागवताभिमानादेः साक्षादसाधनत्वम्)

इत्थं "[11]पशुर्मनुष्यः पक्षी वा ये च वैष्णवसंश्रयाः। तेनैव ते प्रयास्यन्ति तद्विष्णोः परमं पदम्॥" इति, "[12]ते वयं भवता रक्ष्याः भवद्विषयवासिनः। नगरस्थो वनस्थो वा त्वं नो राजा जनेश्वर॥" इति, "[13]समीचीनस्थानेऽयोध्यायां जीवितवन्ति चराचराणि सर्वाणि सत्स्वभावं प्रापितवन्तम्" इति, "[14]बलं नाम त्वदालय-

1 नर्पालयोत्तियिल् वाडुं चराचरं मुट्रवुं नर्पालुक्कुयत्त नन्-तिरुवाय्-7.5.1.

2 वन्मैयावदु निन् कोयिलिल् वाडुं वैट्णवनेन्नुं वन्मै पेरिया 5.1.6

वासी वैष्णव इति बलम्" इत्युच्यमानानां भागवताभिमान-भगवद्विषयवासादीनां स्वकृतेन परकृतेन वा, पूर्वकृतेन पश्चात् करिष्यमाणेन वा केनचिदुपायेन संबन्धो भवति। कथमिति चेत्–इमानि उपासने प्रपत्तौ वा प्रवर्तनेन, उत्पन्नोपासनस्योत्तरोत्तरोपचयाऽऽ-पादनेन, स्वतन्त्रप्रपत्त्यनुष्ठानं कृतवतः ऐहिककैङ्कर्याभिवृद्धिसंपादनेन भगवत्प्राप्तौ त्वरोत्पादनेन चोपकारकाणि भवन्ति॥

(अङ्गप्रधानप्रपत्तिफलभेदः)

एतयोरधिकारिणोः व्यासादिवत् उपायान्तरसमर्थत्वादा-किञ्चन्यमन्तरा, विलम्बक्षमत्वादनन्यगतिकत्वं च विना वर्तमानस्य सद्वारकप्रपत्तिनिष्ठस्य प्रारब्धकर्मपर्यवसानभाव्यन्तिमप्रत्ययावधिकस्योपा-सनरूपाङ्गिनो यथावन्निष्पत्तिपूर्वको मोक्षः फलम्। सर्वाधिकारां सर्वा-निष्टनिवर्तनक्षमां सर्वेष्टसाधनभूतां सुकरां सकृत्कर्तव्याम् आशु-कारिणीं प्रतिबन्धानर्हां ब्रह्मास्त्रवत् स्वफलविषये उपायान्तरप्रयोग-मसहमानां प्रपत्तिं स्वाधिकारानुगुणमद्वारकं स्वीकृतवतः पुंसः— परिपूर्णानुभवप्रतिबन्धकस्यान्यस्य कस्याप्यभावात् प्रपत्तिक्षणमारभ्य, "[15]अत्र संचरतो मम हीनता का" इति "[16]इमं रसं विहायाहं गत्वेन्द्र-लोकपालनजं रसं प्राप्यमपि नेच्छेयम्" इति "[17]अनुरूपं परिपूर्णं शशं

1 इङ्गे तिरिन्दॆर्कु इडुकुट्टेन् 8.10.4.

2 इच्चुवै तविर यान् पोय् इन्द्रलोकमाळुम् अच्चुवै पॆरिनुम् वेण्डेन् तिरुमालै 2

3 एरार् मुयल् विट्टु काक्कैपिन् पोवदे (शिरियतिरुमडल्)

हित्वा काकानुधावनं कुतः" इति "[18]स्नेहो मे परमो राजन् त्वयि नित्यं प्रतिष्ठितः। भक्तिश्च नियता वीर भावो नान्यत्र गच्छति ॥" इति चोक्त-रीत्या अनेन **शरीरेण** सह स्थित्वा **कैङ्कर्यानुभवः** कर्तव्य इत्यभिसन्धे-र्हेतुभूतादर्चावतारादिसङ्गादुपनतया **स्वानुमत्या स्थापितस्य शरीरस्या-**वसानेनैवावधिमान् **देशकालस्वरूप**परिच्छेदवता ऐहिकेन कैङ्कर्यफलोद्ग-मेन **प्रथमेन सहितः** परिपूर्णकैङ्कर्यपर्यन्तमोक्षः फलम् ॥

(प्रपत्तेर्यथाभिमतफलसाधनत्वम्)

[19]"वरं वरय तस्मात् त्वं यथाभिमतमात्मनः। सर्वं संपत्स्यते पुंसां मयि दृष्टिपथं गते ॥" "[20]किं वा सर्वजगत्स्रष्टः प्रसन्ने त्वयि दुर्लभम्", "[21]तस्मिन् प्रसन्ने किमिहास्त्यलभ्यम्" "[22]किं लोके तदिह परत्र चापि पुंसां यत् विष्णुप्रवणधियां न दाल्भ्य! साध्यम्", "[23]फलमत उपपत्तेः" इत्युक्तरीत्या **सर्वेश्वरस्य सकलफलप्रद-**त्वात् तच्चरणयोः **प्रपत्तेः सकलफलसाधनत्वा**देषामधिकारिणा-मुभयेषामियं सकलफलहेतुर्भवति ।

(भक्तेरिव प्रपत्तेश्चतुर्विधफलसाधनत्वम्)

"[24]चतुर्विधा भजन्ते माम्" इत्युक्ततयो**पासनं** यथा **चतुर्विधफल**साधनं भवति, तथा "[25]तावदार्तिस्तथा वाञ्छा तावन्मोहस्तथाऽसुखम्। यावन्न याति शरणं त्वामशेषाघनाशनम् ॥" इति प्रपत्तिरप्यस्य **चतुर्विधफलस्य साधन**मिति किल महर्षयः सिद्धान्तयन्ति। अत्र "अशेषाघनाशनम्" इत्युक्ते, "तावत्" इत्यस्य आदरप्रत्यायनाय प्रत्यधिकारमावर्तनाच्चैतदपे**क्षितफलं** सर्वमेत-न्निर्दिष्टकाले **यथामनोरथं** सिध्येत् (इति प्रतीयते) ॥

(स्वतन्त्रप्रपत्तिनिष्ठस्योत्कर्षः)

एवंविधं समुत्कर्षमभिसन्धायैव, "[26]सत्कर्मनिरताः शुद्धाः सांख्ययोगविदस्तथा । नार्हन्ति शरणस्थस्य कलां कोटितमीमपि ॥" इत्युच्यते ।

(प्रपन्नस्यैहिककैङ्कर्यवैषम्ये हेतुः)

अस्येह जीवनकाले **कैङ्कर्ये वैषम्यं** स्वाभिप्रायवैषम्यात् प्राप्तम् । तस्य हेतुः **प्रारब्धसुकृतविशेषः** । अन्तिमशरीरानन्तरं प्राप्ये पुरुषार्थे किमपि **वैषम्यं** नास्ति । **पारतन्त्र्यमेकरूपम्** । "[27]पारतन्त्र्यं परे पुंसि प्राप्य निर्गतबन्धनः । स्वातन्त्र्यमतुलं प्राप्य तेनैव सह मोदते" इति **फलदशायामुच्यमानं स्वातन्त्र्यमपि** कर्मवश्यत्वापायविशिष्ट सर्वविधकैङ्कर्ययोग्यतारूपमिति फलपादे निर्णीतम् ॥

(अधिकारार्थसंग्राहिका गाथा)

(गाथा) अपेक्षणीयो महापुरुषार्थो मोक्ष इति विज्ञाय विधिभेदात् दीर्घतया ह्रस्वतया च स्थितयोर्निष्ठयोर्योग्या भक्ताः एकस्यां प्रवृत्त्य, मूलकर्मणां विनिवर्तने मुकुन्दचरणाश्रयणमन्तराऽन्यः कश्चिदुपायो नास्तीति स्थिताः ॥

---

1 वेण्डुं पेरुं पयन् वीडॆन्ररिन्दु विदिवहैयाल् नीण्डुंकुरुहियुं निर्कुं निलै हळुक्केर्कुमन्बर् मूण्डॊन्त्रिल् मूलविनै माट्रुदलिल् मुकुन्दनडि पूण्डन्रि मट्रोर् पुहलोन्रिलै येन निन्रनरे ॥

प्रपन्नादन्येषां न दिशति मुकुन्दो निजपदं
प्रपन्नश्च द्वेधा सुचरितपरीपाकभिदया ।
विलम्बेन प्राप्तिर्भजनसुखमेकस्य विपुलं
परस्याऽऽशु प्राप्तिः परिमितरसा जीवितदशा ॥

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीमद्रहस्यत्रयसारे अधिकारिविभागाधिकारोऽष्टमः ॥

श्रीमते निगमान्तमहादेशिकाय नमः

—o—o—

श्रीः

उपायविभागाधिकारः

उपायः स्वप्राप्तेरुपनिषदधीतः स भगवान्
प्रसत्त्यै तस्योक्ते प्रपदननिदिध्यासनगती ।
तदारोहः पुंसः सुकृतपरिपाकेन महता
निदानं तत्रापि स्वयमखिलनिर्माणनिपुणः ॥

(उपायोपेयनिरूपणम्)

एषां कर्तव्य उपायस्तावत्—कश्चित् ज्ञानविकासविशेषः। अनेन साध्यः प्राप्तिरूप उपेयश्च तावत्—कश्चित ज्ञानविकासविशेषः। एतयोरुपायभूतो ज्ञानविकासविशेषः करणसापेक्षः शास्त्रविहितः सत्यत्वादिस्वरूपनिरूपकधर्मपञ्चकसंवलित-तत्तद्विद्याविशेषप्रति-नियतगुणादिनियतब्रह्मविषयश्च भवति। उपेयभूतो ज्ञानविकास-विशेषः करणनिरपेक्षः स्वभावप्राप्तो गुणविभूत्यादिसर्वपरि-पूर्णब्रह्मविषयो भवति।

उपासितगुणादेर्या प्राप्तावप्यबहिष्क्रिया।

सा तत्क्रतुनयग्राह्या नाऽऽकारान्तरवर्जनम् ॥

प्राप्तिरूपस्यानुभवस्य परीवाहात्मना कैङ्कर्यमुपेयम्।

(भगवत उपायत्वोपेयत्वे)

अस्योपायरूपस्य प्राप्तिरूपस्य च ज्ञानस्य विषयभूतस्य सत ईश्वरस्य फलप्रदत्वभोग्यत्वादिवेषेणोपायत्वोपेयत्वे भवतः। इदमीश्वरस्योपायत्वमद्वारकप्रपत्तिनिष्ठविषये उपायान्तरस्थानानि-वेशेन विशिष्टं भवति। अधिकार्यन्तरविषयेऽपि कर्मयोगारम्भ-कालप्रभृतौ उपासनपूर्तिपर्यन्ते काले अन्तरालकर्तव्येष्वत्यन्ताशक्यविषयेषु एतत्प्रपत्तिवशीकृत ईश्वरः प्रविश्य स्थित्वा तैर्दुष्करकर्तव्यैः साध्यां पापनिवृत्तिं सत्त्वोन्मेषादीनि चोत्पाद्य तमुपासनरूपमुपायं फलपर्यन्तं करोति ॥

(कर्मयोगनिरूपणम्)

तत्र **कर्मयोगो नाम**—शास्त्रेण जीवपरमात्मयाथात्म्यज्ञाने निष्पन्ने स्वशक्त्यैः फलसङ्गादिरहितैः काम्यकर्मभिः नित्यनैमित्तिकैश्च सह सनियमं परिगृहीतः कर्मविशेषः। तत्रावान्तरभेदाः, "[1]दैवमेवापरे यज्ञम्" इत्युपक्रम्य गीताः देवार्चन-तपस्तीर्थ-दान-यज्ञादयः । **अधिकारिभेदेन** प्रपत्तिः स्वयं भक्तिं द्वारीकृत्य अद्वारीकृत्य च यथा मोक्षहेतुर्भवति, तथाऽयं कर्मयोगो ज्ञानयोगं द्वारीकृत्याद्वारीकृत्य च सपरिकरयोगमुखेनाऽऽत्मावलोकनसाधनं भवति ॥

(ज्ञानयोगनिरूपणम्)

ज्ञानयोगो नाम-कर्मयोगोत्पन्नान्तःकरणजयेन पुंसा प्रकृत्यादि-विलक्षणस्य, ईश्वरं प्रति आधेयत्वविधेयत्वशेषत्वैः शरीरतया प्रकारभूतस्य स्वस्वरूपस्य निरन्तरचिन्तनकरणम् । आभ्यां योगमुखेनाऽऽत्मावलोकने निष्पन्ने सति—वैषयिकसुखवैतृष्ण्यावहे आत्मानुभवसुखरूपे आकर्षके अनिमग्नश्चेत् (अलग्नश्चेत्), तर्हि परम-पुरुषार्थभूतस्य भगवदनुभवस्योपाये भक्तियोगे प्रवृत्तस्य तदा, अन्तस्स्थरत्नदर्शनार्थं वस्त्रग्रन्थिदर्शनवत्, अन्तर्यामिदर्शनार्थं तच्छरीर-भूतजीवात्मदर्शनमुपयुक्तं भक्तियोगाधिकारकोटौ निविशते ॥

(भक्तियोगनिरूपणम्)

भक्तियोगो नाम—अनन्यनिष्ठ अनन्याधीन-अनन्यशेष-भूतभगवत्स्वरूपादिविषयको निरतिशयप्रीतिरूपो ध्यानविशेषः। स च तैलधारावन्निरन्तरस्मृतिरूपः साक्षात्कारतुल्यवैशद्यवान्

परमपदप्रयाणदिवसपर्यन्तमहरहरनुष्ठानेन वर्धमानोऽन्तिमप्रत्ययावधिको ज्ञानसन्ततिविशेषः । अस्य वर्णाश्रमधर्माः ज्ञानविकासहेतुभूतसत्त्वविवृद्धिप्रतिबन्धकरजस्तमोमूलभूतपापनिबर्हणद्वारा इतिकर्तव्यता भवन्ति । अयं भक्तियोगः, "[2]प्रत्ययार्थं च मोक्षस्य सिद्धयः संप्रकीर्तिताः" इत्युक्तरीत्या दुर्बलचित्तानां विश्वासजननार्थविहितोपायनीत्या कामनाभेदेनैश्वर्यादीनां साधनं भवतीत्ययमर्थः, "[3]चतुर्विधा भजन्ते माम्" इति गीतः । तत्र "[4]तेषां ज्ञानी नित्ययुक्तः एकभक्तिर्विशिष्यते" इत्युपक्रम्य गीतं ज्ञानिनः समुत्कर्षम्, "[5]चतुर्विधा मम जना भक्ता एव हि ते स्मृताः । तेषामेकान्तिनः श्रेष्ठास्ते चैवानन्यदेवताः ॥ अहमेव गतिस्तेषां निराशीःकर्मकारिणाम् । ये तु शिष्टास्त्रयो भक्ताः फलकामा हि ते मताः । सर्वे च्यवनधर्माणः प्रतिबुद्धस्तु मोक्षभाक् ॥" इति स्वयमेव प्रकाशयामास ।

(परभक्तिपरज्ञानपरमभक्तिनिरूपणम्)

इत्थं मोक्षोपायत्वेन विहितो भक्तियोगः परभक्तिरित्यभ्यधायि । एतद्धेतुभूतः सात्त्विकपरिशीलनादिजनितो भगवद्विषये प्रीतिविशेषः, 'सर्वेश्वरो विशदं ज्ञातव्यः' इत्यभिनिवेशस्य कारणं सन् भक्तिरिति समाख्यायते । अनेन, "[6]शुद्धभावं गतो भक्त्या शास्त्राद्वेद्मि जनार्दनम्" इत्युक्तरीत्या शास्त्रजन्यतत्त्वज्ञान-कर्मयोगादिपरम्परया जाता परभक्तिः साक्षात्कर्तव्य इत्यभिनिवेशमुत्पाद्य, "[7]योगेश्वर ततो मे त्वं

दर्शयाऽऽत्मानमव्ययम्", "[8]दर्शनोपायमनुगृहाण", "एकस्मिन् दिने दर्शनार्थमागच्छ" इति **विलापदशामापाद्य** एतदपेक्षामात्रनिबन्धनेन **भगवत्प्रसादविशेषेण तत्कालनियतं परिपूर्णं साक्षात्कार**मुत्पादयति । एष साक्षात्कारः **परज्ञान**मित्यभ्यधायि । इत्थं **निरतिशयभोग्यभगवत्स्वरूपसाक्षात्कार**समनन्तरमेव अतितापश्रमार्तस्य जलाशयदर्शनेनेव जातः **प्रीत्यतिशयः परमभक्तिः । इयं** "मुने चतुर्मुख" इति दशकोक्तरीत्या असंकुचितानुभवमन्तराऽऽत्मधारणस्याशक्यतामापादयन्तमभिनिवेशमुत्पाद्य अप्रत्याख्येयलक्ष्मीविषयकशपथपूर्वं सनिर्बन्धाह्वानसाधनात् अस्य झटिति स्वप्राप्तिदानार्थं सर्वेश्वरस्य **त्वरातिशय**मुत्पाद्य एनमभिनिवेशोपशमनेन मोक्षं प्रापयति ।

(प्रपत्तेः परभक्तिस्थानापन्नत्वम्)

अयं भक्तियोगस्त्रैवर्णिकेतरेषाम्, **त्रैवर्णिकेष्वपि ज्ञानतः शक्तित उभयतोऽपि** वा न्यूनतावताम् **फलविलम्ब**सहनानिच्छापादक**तीव्रसंवेग**वतां चायोग्य इति स्वस्थितीः विशदं विज्ञाय अद्वारकतया **प्रपत्तिं मोक्षोपायत्वेन** परिगृह्णतां विषये सर्वफलसाधनभूतायाः **प्रपत्तेः परभक्तिस्थाने** चोदितत्वात् उपासकस्य परभक्तेः परस्ताज्जायमाना अवस्था इव, अस्य स्वतन्त्रप्रपत्तिनिष्ठस्य प्रार्थनानुगुणमेतत्प्रपत्त्यनन्तरं जायमाना अनुकूलावस्था अस्याः फलभूताः ॥

---

[8] काणुमारुळाय् — तिरुवाय्-8-1-1
ओरु नाळ् काणवाराय् — „ 6-9-4
मुनिये ! नान्मुकने ! — „ 10-10-1

(भक्तिप्रपत्त्योर्विकल्पभेदादिनिरूपणम्)

इत्थं भक्तिप्रपत्त्योरधिकारिविशेषं प्रति तुल्यफलत्वात् विकल्पो भवति। एतयोः "[11]नाना शब्दादिभेदात्" इत्यधिकरणे भेदः सिद्धः; "[12]विकल्पोऽविशिष्टफलत्वात्" इत्यधिकरणे विकल्पः सिद्धः। उपासने विशेषा इव शाखाभेदेषु भगवच्छास्त्रसंहिताभेदेषु च प्रतिपाद्यमानाः न्यासविद्यायां मन्त्रादिविशेषा द्रष्टव्याः।

नमस्कारे वाचिकमानसकायिकविभागवत् प्रपत्तावपि एकैकं पुरस्कृत्येमे विभागा उक्ताः। एषां त्रयाणां समवाये पूर्णनमस्कार-वत् पूर्णप्रपत्तिर्भवतीति प्रतिपादयतां वाचामपि वाचिककायि-कव्यापारविशेषौ परीवाहयन्त्याः मानसप्रपत्तेः पूर्तौ तात्पर्यं ग्राह्यम्। यथाधिकारमेते सर्वेऽपि (विभागाः) फलप्रदा इत्येतमर्थं पूर्वमेवावोचाम ॥

(अधिकारार्थसंग्राहिका गाथा)

(गाथा) सिद्धस्वाधिकारानुरूपतया स्थितं धर्मं, सूक्ष्मबुद्ध्या समीचीनमिति अन्विष्टं ज्ञानम्, सुखमयान्तर्दृष्टिं बहद्भिरैदम्पर्य-परिगृहीतां भक्तिम्, अकिञ्चनानां त्वरमाणानां भगवत्कृपया तत्काल एव फलप्रदमुपायं च विजानन्तो ब्राह्मणाः ॥

निन्रनिलैक्कुर निर्कुङ्करुममु नेर्मतियाल्
नन्रेन नाडिय ज्ञानमुं नल्हुमुट्रकण्णुडैयार्
ओन्रिय पत्तियुमोन्रुमिलोविरैवार्करुलाल्
अन्रु पयन् तरुमारुमरिन्दुरन्दणरे ॥

कर्म ज्ञानमुपासनं च शरणव्रज्येति चावस्थितान्
सन्मार्गान् अपवर्गसाधनविधौ सद्वारकाद्वारकान् ।
एकद्व्याकृतियोगसंभृतपृथग्भावानुभावानिमान्
सम्यक् प्रेक्ष्य शरण्यसारथिगिरामन्ते रमन्ते बुधाः ॥

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीमद्रहस्यत्रयसारे उपायविभागाधिकारो नवमः ॥
श्रीमते निगमान्तमहादेशिकाय नमः

—०—८—

श्रीः

प्रपत्तियोग्याधिकारः

अर्थित्वेन समर्थता त्रिकतनुः संपिण्डिताऽधिक्रिया
सा चाष्टाङ्गषडङ्गयोगनियतावस्था व्यवस्थापिता ।
श्रौती सर्वशरण्यता भगवतः स्मृत्याऽपि सत्यापिता
सत्यादिष्विव नैगमेष्वधिकृतिः सर्वास्पदे सत्पथे ॥

इत्थमभिमतफलार्थमुपायान्तरनिस्स्पृहेण न्यासविद्यायां प्रवर्तमानेन अस्या विद्याया अधिकारविशेषादिकं यथावद्वेदितव्यम् ।

(सामान्यतः अधिकारनिरूपणम्)

अधिकारो नाम तत्तत्फलोपायेषु प्रवर्तमानस्य पुरुषस्य फलेऽर्थित्वम् उपाये सामर्थ्यञ्च। अत्र सामर्थ्यं नाम—शास्त्रार्थस्य ज्ञानं यथाज्ञानमनुष्ठाने शक्तिः शास्त्रानुमतजातिगुणादियोग्यता च। अयमधिकारः पूर्वमेव सिद्धो भवति।

एतद्भूतः प्रयोजनं सत् साध्यत्वेनानूद्यमानं यत्, तत् फलम्। तदर्थं साध्यत्वेन विधीयमानोऽर्थः उपायः।

अत्र मुमुक्षुत्वे संपन्ने स्वतन्त्रप्रपत्तिरूपोपायविशेषनिष्ठस्य शास्त्रजन्यसम्बन्धज्ञानादिषु उपासकसाधारणेषु सत्सु विशिष्यमाणोऽधिकारः स्वस्याऽऽकिञ्चन्यमनन्यगतित्वं च। आकिञ्चन्यं नाम— उपायान्तरसामर्थ्याभावः। अनन्यगतित्वं नाम—प्रयोजनान्तरवैमुख्यम्। शरण्यान्तरवैमुख्यं वा; इदं प्रयोजनान्तरवैमुख्येनाप्यर्थसिद्धम्। अयमर्थः, "1ब्रह्माणं शितिकण्ठं च याश्चान्या देवताः स्मृताः। प्रतिबुद्धा न सेवन्ते यस्मात् परिमितं फलम्॥" इत्यादिषु द्रष्टव्यः। तीव्रतमं मुमुक्षुत्वमन्तरा देहानुवृत्त्यादिप्रयोजनान्तरसक्तो मोक्षार्थं प्रपत्तिं परिगृहीतवांश्चेत्, तत्तत्प्रयोजनान्तरावध्यनुरोधेन मोक्षो विलम्बेत।

(प्रपत्त्यधिकारस्य निबन्धनम्)

अस्याऽऽकिञ्चन्यस्यानन्यगतित्वस्य च निबन्धनमुपायान्तरेष्वस्याधिकारिणोऽज्ञानाशक्ती फलविलम्बासहत्वं च। अत्र शरण्यान्तरवैमुख्यस्य निबन्धनम्, "2यथा वायोस्तृणाग्राणि

वशं यान्ति बलीयसः । धातुरेवं वशं यान्ति सर्वभूतानि भारत" इत्युक्तरीत्या स्वपरसाधारणस्य भगवदेकपारतन्त्र्यस्याध्यवसायः प्रयोजनान्तरवैमुख्यं च ॥

(तत्र प्रमाणम्)

अयं प्रपत्त्यधिकारविशेषः, "[3]स पित्रा च परित्यक्तः सुरैश्च समहर्षिभिः । त्रीन् लोकान् संपरिक्रम्य तमेव शरणं गतः ॥", "[4]अहमस्म्यपराधानामालयोऽकिञ्चनोऽगतिः", "[5]अकिञ्चनोऽनन्यगतिः शरण्य" "[6]अनागतानन्तकालसमीक्षयाऽप्यदृष्टसन्तारोपायः" "[7]तत्प्राप्तये च तत्पादाम्बुजद्वयप्रपत्तेरन्यन्न मे कल्पकोटिसहस्रेणापि साधनमस्तीति मन्वानः", "[8]शरणान्तरशून्यो दासोऽहम्" इत्येवमादिप्रमाणसंप्रदायाभ्यां सिद्धः । एतावत्यधिकारे लब्धे प्रपत्तेर्जात्यादिनियमाभावात् सर्वाधिकारत्वं सिद्धम् ॥

(अधिकारार्थसंग्राहिका गाथा)

(गाथा) ब्राह्मणान्त्यजावध्यन्तर्गताः (आब्राह्मणात् आ चान्त्यजात् स्थिताः) सर्वे लोका शोकाविष्टत्वरूपमुख्याधिकारेण, कृशाः अनन्या भूत्वा एत्य यथा आश्रयेयुः, तथा भक्ताः सुदृढकृपां धृत्वा प्रयस्यन्तमस्मदीयमनन्तमादिं विदित्वा उपदिदिशुः ॥

पुहलोन्निलावडियेन्-तिरुवाय-6-10-10

अन्दणरन्दियरेल्लैयिल् निन्र अनैत्तुलहुम्

नोन्दवरे मुदलाक नुडङ्गि यनन्नियराय

वन्दडैयुम् वहै वन्तहवेन्दिवरुन्दिय नम्

अन्दमिलादियै यन्बररिन्दरिविक्तनरे ॥

भक्त्यादौ शक्त्यभावः प्रमितिरहितता शास्त्रतः पर्युदासः
कालक्षेपाक्षमत्वं त्विति नियतिवशादापतद्भिश्चतुर्भिः ।
एकद्वित्र्यादियोगव्यतिभिदुरनिजाधिक्रियाः संश्रयन्ते
सन्तः श्रीशं स्वतन्त्रप्रपदनविधिना मुक्तये निर्विशङ्काः ॥

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु श्रीमद्रहस्यत्रयसारे
प्रपत्तियोग्याधिकारो दशमः

श्रीमते निगमान्तमहादेशिकाय नमः

—o—●—

श्रीः

परिकरविभागाधिकारः

इयानित्थम्भूतः सकृदयमवश्यम्भवनवान्
दयादिव्याम्भोधौ जगदखिलमन्तर्यमयति ।
भवध्वंसोद्युक्ते भगवति भरन्यासवपुषः
प्रपत्तेरादिष्टः परिकरविशेषः श्रुतिमुखैः ॥

(न्यासविद्यापरिकरः)

अस्यां विद्यायाः परिकरस्तावत्—आनुकूल्यसंकल्पः प्रातिकूल्यवर्जनं कार्पण्यं महाविश्वासो गोप्तृत्ववरणं च ।

अत्र "[1]आनुकूल्यस्य संकल्पः प्रातिकूल्यस्य वर्जनम् । रक्षिष्यतीति विश्वासो गोप्तृत्ववरणं तथा । आत्मनिक्षेपकार्पण्ये षड्विधा शरणागतिः" इत्यादिषूच्यमानं षाड्विध्यमपि अष्टाङ्गयोग-व्यवहारवत् अङ्गाङ्गिसमुच्चयनिबन्धनमित्ययमर्थः, एषु किञ्चिदेक-मेवाङ्गि इतराणि अङ्गानीत्ययमर्थश्च, "[2]निक्षेपापरपर्यायो न्यासः पञ्चाङ्गसंयुतः । संन्यासस्त्याग इत्युक्तः शरणागतिरित्यपि" इति श्लोकेन न्यायनिरपेक्षं सिद्धौ ।

(मुमुक्षुभरन्यासे फलत्यागरूपाङ्गान्तरम्)

अत्र, "[3]शाश्वती मम संसिद्धिरियं प्रह्वीभवामि यत् । पुरुषं परमुद्दिश्य न मे सिद्धिरितोऽन्यथा । इत्यङ्गमुदितं श्रेष्ठं फलेप्सा तद्विरोधिनी ॥" इत्यहिर्बुध्न्योक्तं फलत्यागरूपाङ्गान्तरं मोक्षार्थे आत्मनिक्षेपे नियतम् ॥ फलसङ्गकर्तृत्वादित्यागस्य कर्मयोग-प्रभृतिषु निवृत्तिधर्मेषु सर्वेषु अनुवृत्तेः एतदनुसंधानं मुमुक्षोः साङ्गसमर्पणदशायां कर्तव्यम् ।

(आनुकूल्यसंकल्पाद्यङ्गानां निबन्धनं फलञ्च)

अत्र परिकरभूतेष्वानुकूल्यसंकल्पप्रतिकूल्यवर्जनयोर्नि-बन्धनं सर्वशेषिणः श्रियः पत्युर्विषये प्रवृत्तिनिवृत्तिभ्यामभि-मतानुवर्तनस्य कर्तव्यतायाः प्रयोजकमेतद्गतं पारार्थ्यज्ञानम् । एतेन, "[4]आनुकूल्येतराभ्यां तु विनिवृत्तिरपायतः" इत्युक्तरीत्या अपाय-परिहारः सिद्धः ।

कार्पण्यं तावत् पूर्वोक्तस्याऽऽकिञ्चन्यादेरनुसन्धानरूपं वा तन्निबन्धनगर्वहानिरूपं वा कृपाजनककृपणवृत्तिरूपं वा भवत् शरण्यकारुण्योत्तम्भनार्थं च सत् "[5]कार्पण्येनाप्युपायानां विनिवृत्तिरिहेरिता" इत्युक्तरीत्या पश्चादप्यनन्योपायताया उपयुक्तं भवति।

महाविश्वासः, "[6]रक्षिष्यतीतिविश्वासादभीष्टोपायकल्पनम्" इत्युक्तरीत्या सहायान्तरनिरपेक्षानुष्ठानसिद्ध्यर्थः सन् पश्चात् निर्भरताया अपि प्रयोजको भवति।

स्वरूपानुचितपुरुषार्थवत् स्वरूपप्राप्तोऽपवर्गोऽपि पुरुषार्थत्वात् पुरुषेणार्थितत्वे सत्येव दातव्य इत्यतोऽत्र गोप्तृत्ववरणमप्यपेक्षितम्। समीचीनमपि कञ्चिदर्थं पुरुषेऽर्थयमाने सत्येव ददातीत्यस्याभावे हि न पुरुषार्थं दत्तवान् स्यात्। अत एव हि "[7]अप्रार्थितो न गोपायेत्" इति, "[8]गोप्तृत्ववरणं नाम स्वाभिप्रायनिवेदनम्" इति चोच्यते।

इत्थमिमानि पञ्चापि एतद्विद्यानुष्ठानकाले उपयुक्तानीति इमानि अस्यात्मनिक्षेपस्याविनाभूतस्वभावानि।

(एषां प्रपत्त्यविनाभावस्य त्रिजटाविभीषणशरणागत्योः प्रदर्शनम्)

अयमर्थः श्रीजानकीं शरणत्वेन वरीतुमागच्छतेति सात्त्विकप्रकृतिकया त्रिजटया राक्षसीः प्रति उच्यमाने वाक्येऽपि सुदर्शः। "[9]तदलं क्रूरवाक्यैर्वः" इति प्रातिकूल्यवर्जनमभ्यधायि। "[10]सान्त्वमेवाभिधीयताम्" इत्युक्तेः, मनःपूर्वकत्वमन्तरा वाक्प्रवृत्तेरसंभवात् आनुकूल्यसंकल्पाकर्षणं फलितम्। "[11]राघवाद्धि भयं घोरं राक्ष-

सानामुपस्थितम्" इत्यनन्यगतिकत्वावस्थायाः प्रतिपादनादधिकार भूतमाकिञ्चन्यम्, तदनुसन्धानमुखेन प्राप्तं गर्वहान्यादिरूपमङ्गभूत-कार्पण्यं चाभिहितं भवति। "[12]अलमेषा परित्रातुं राक्षस्यो महतो भयात्" इत्युक्तेः, एतद्विवरणतया "[13]अलमेषा परित्रातुं राघवाद्राक्षसीगणम्" इति श्रीहनूमताऽनुवादाच्च भगवति कंचिन्निजिघृक्षत्यपि तत्क्रोधं प्रशमय्येयं रक्षणे समर्थेति, रक्षिष्यतीति विश्वासोऽभ्यधायि।" "[14]अभियाचाम वैदेहीमेतद्धि मम रोचते" "[15]भर्त्सितामपि याचध्वं राक्षस्यः किं विवक्षया" इत्युक्त्या गोप्तृत्ववरणमभ्यधायि। एषां पञ्चानामप्यङ्गिभूत आत्मनिक्षेपः, "[16]प्रणिपातप्रसन्ना हि मैथिली जनकात्मजा" इति प्रसादकारणविशेषप्रतिपादकेन प्रणिपात-शब्देन विवक्षितः सिद्धः। अतः, "[17]न्यासः पञ्चाङ्गसंयुतः" इति शास्त्रार्थोऽत्र पूर्णः।

इत्थमुपदिष्टे सति राक्षसीनामनिवारणमेवोपघ्नीकृत्य श्रीजानकी स्वकीयवात्सल्यातिशयेन, "[18]भवेयं शरणं हि वः" इत्यनुजग्राह। अस्य वाक्यस्य सहृदयतां फलपर्यन्ततां च "मातर्मैथिलि राक्षसीस्त्वयि तथैवाऽऽर्द्रापराधास्त्वया रक्षन्त्या पवनात्मजाल्लघुतरा रामस्य गोष्ठी कृता" इत्यभियुक्ताः प्रकाशयामासुः। अत्र त्रिजटाया आत्मात्मीयसमर्पणे तस्या औत्पत्तिकसंबन्धात् अस्मदीया इति कटाक्षस्य विषयभूता राक्षस्योऽप्यन्तर्भूताः।

एवमेव श्रीविभीषणेन सहाऽऽगताश्चत्वारो राक्षसा अपि तदीयोपायेऽन्तर्भूताः। तत्रत्ये अभयप्रदानप्रकरणेऽप्ययमङ्गाङ्गिवर्गः

अन्तर्गमयितुं शक्यः। कथमिति चेत्—प्रातिकूल्ये व्यवस्थितस्य रावणस्यापि, "प्रदीयतां[20] दाशरथाय मैथिली", "[21]सीतां च रामाय निवेद्य देवीं वसेम राजन्निह वीतशोकाः" इति हितवचनात् आनुकूल्यसंकल्पः सिद्धः। इदं हितवचनं पित्तोपहतस्य तिक्ततयाभासमानं क्षीरमिव तस्योद्वेगहेतुः समपद्यत। "[22]त्वां तु धिक् कुलपांसनम्" इति धिक्कारे कृते सति, इतः परमस्मै नोपदेशो युक्तः, एतेनानुबद्धा विभूतयोऽपि नोचिताः, एतदधिष्ठितस्थाने निवासोऽपि न युक्त इति निश्चित्य "[23]त्यक्त्वा पुत्रांश्च दारांश्च", "[24]परित्यक्ता मया लङ्का मित्राणि च धनानि च" इति स्ववाक्योक्तरीत्या तत्रत्यसंबन्धविच्छेदेनावस्थानात् प्रातिकूल्यवर्जनाभिसन्धिः सिद्धः। "[25]रावणो नाम दुर्वृत्तः" इत्यारभ्य सर्वजितारावणेन सह विरोधात् स्वस्यागतिकतयाऽवस्थितेर्वर्णनेन, पश्चादपि "[26]अनुजो रावणस्याहं तेन चास्म्यवमानितः। भवन्तं सर्वभूतानां शरण्यं शरणं गतः॥" इत्युक्त्या च कार्पण्यं प्रत्यपादि। निर्भयमागत्योपसृत्य, "[27]सर्वलोकशरण्याय राघवाय महात्मने।" इत्येवं प्रार्थनस्य प्रयोजको महाविश्वासः, "[28]विभीषणो महाप्राज्ञः" इति कारणमुखेन प्रत्यपादि। प्राज्ञताविशेषकेन महच्छब्देन विश्वासातिशय एव विवक्षित इति वा। "[29]राघवं शरणं गतः" इत्युक्त्या उपायवरणान्तर्नीतं गोप्तृत्ववरणमुक्तं भवति। उपायवरणशब्देन व्यञ्जितत्वमात्रातिरेकेण, "[30]निवेदयत मां क्षिप्रं विभीषणमुपस्थितम्" इत्युक्त्या घटकपुरस्सर आत्मनिक्षेपः प्रतिपादितो भवति। अस्मिन् प्रकरणे निवेदनशब्दो विज्ञापनमात्रपरत्वे निष्प्रयोजनः।

इत्थमन्यान्येषु **प्रपत्तिप्रकरणेषु लौकिकद्रव्यनिक्षेपेषु च संक्षेपविस्तरप्रक्रियया इमेऽर्थाः** सुदर्शाः। स्वेन रक्षितुमशक्यस्य कस्यचिद्वस्तुनः रक्षणसमर्थस्य कस्यचित् सन्निधौ समर्पणावसरे स्वयं तद्विषये अनुकूलाभिसन्धिमान् भूत्वा, प्रतिकूलाभिसन्धिं हित्वा, अयं रक्षणसमर्थः, अपेक्षायां कृतायां रक्षणं कुर्याच्चेति विश्वस्य, स्वस्य रक्षणासामर्थ्यं विनिवेद्य त्वया संरक्षितव्यमिति प्रार्थ्य, रक्ष्यवस्तु तत्सन्निधौ समर्प्य स्वयं निर्भरः निर्भयमुरसि हस्तं निधाय शयित्वा स्वपितीत्येतदध्यक्षयामः किल।

(आनुकूल्यसंकल्पादेर्द्वयेऽनुसन्धानस्थलप्रदर्शनम्)

एवं नियतमिदं सर्वं क्रियमाणार्थप्रकाशके द्वयाख्यमन्त्रे कथमनुसन्धेयमिति चेत्—**सार्वज्ञ्यसर्वशक्तियुक्तस्य कर्मानुरूपफलप्रदस्य सर्वोपकारनिरपेक्षस्य क्षुद्रदेवतावत् क्षिप्रकारित्वमन्तरा वर्तमानस्य समाधिकदरिद्रस्य सर्वेश्वरस्य अनन्तापराधवद्भिरभिगन्तव्यत्वम्,** प्राप्तिविरोध्यनन्तापराधवद्भ्योऽपरिमितफलदातृत्वम्, अल्पव्यापारस्य कृते दानम्, अविलम्बेन दानम्, तारतम्यानादरेण दानं च कथं घटेरन् इति **शङ्कानां** निवर्तकान् **यथासंभवमुपायत्वप्राप्यत्वोपयुक्ततया** स्थितान् **पुरुषकारसंबन्धगुणव्यापारप्रयोजनविशेषरूपान्** शेषिण **आकारान्** गर्भीकुर्वति **श्रीमच्छब्दे नारायणशब्दे च** आर्थतयाऽऽनुकूल्यसंकल्पः **प्रातिकूल्यवर्जनं** चानुसन्धेये भवितुमर्हतः। एवं विशिष्टं स्वामिनं प्रकाशयन्तौ **शब्दौ औचित्यात्** तद्विषये प्राप्तमभिमतानुवर्तनसंकल्पम् **अनभिमतनिवर्तनं च प्रकाशयतः।**

एषां पुरुषकारादीनां पञ्चानां विशेषास्तावत्—अप्रत्याख्येयत्वं नाशयितुमशक्यत्वं निरुपाधिकत्वं सहकारिप्रतीक्षाराहित्यम् अतिनीचानां परेषां पुरुषार्थस्यैव स्वपुरुषार्थत्वं चेति (यथासंख्यम्)।

(महाविश्वासविरोधिपूर्वोक्तशङ्कापरिहारप्रकारः)

एभिः पञ्चभिर्विशेषैः **शंकापरिहारः** कथं जात इति चेत्—**सर्वज्ञः सर्वशक्तिश्च** सन्नपि **अप्रत्याख्येयपुरुषकारविशेषेण** अन्तःपुरपरिजनविषय इव अभिगन्तव्यताविरोध्यनन्ता**पराधान्** क्षमित्वा, एषां विषये 'अविज्ञाता' इति वर्णनार्हतयाऽवस्थितो**ऽभिगन्तव्यो** भवति। **कर्मानुरूपफलप्रदः** सन्नपि, अनेन **प्रपत्तिरूपव्याजेन प्रसन्नः** सन् **स्वामित्वदासत्वसंबन्धोपाधिकतया दायवत् स्वतः-प्राप्तम**परिमितं फलं ददीत। **अवाप्तसमस्तकामत्वात्सर्वोपकारनिरपेक्षः** सन्नपि, **अल्पव्याजवशीकार्यसुजनसार्वभौमवत्** स्वकीयनि**रुपाधिककारुण्यादिभिः** एतत्कृतं क्षुद्रव्यापारमपि स्वस्य **परमोपकार**तयाऽऽद्रियमाणः सन् **कृतज्ञः कार्यं** कुर्वीत। क्षुद्रदेवतावत् क्षिप्रकारी अभवन्नपि, इतरेषां शास्त्रार्थानां विलम्बेन फलं ददानोऽपि, **अनन्यशरणस्य प्रपत्तेः, औदार्यादिगुणसहितेन सहकार्यन्तरनिरपेक्षेण स्वसंकल्पमात्रेण** काकविभीषणादिभ्य इव एतदुद्दिष्टकाले, अपेक्षितं ददीत। **समाधिकदरिद्रः** सन्नपि, यतः **स्वातन्त्र्यादिगुणविशिष्टः** स्वप्रयोजनतयाऽऽश्रितानामपेक्षितं साधयति अतः, कोसलजनपदस्थितजन्तुभ्य इव, **कुमारेण** सह **तिरश्चे** शुकाय क्षीरप्रदानन्यायेन तारतम्यमनवलोकयन् ददीत। इत्थं **यथालोकं** जातानां **शङ्कानां यथालोकं** परिहाराणां सत्त्वात् **यथाशास्त्रं** प्रपत्तेरपेक्षितसाधनत्वे न कापि हानिः।

(महाविश्वासासंभवतत्संभवोपपादनम्)

इदं विशिष्टं पुरुषकारादिपञ्चकं सदाचार्यकटाक्षविशेषात् प्रबुद्धवन्तं विनाऽन्यस्य महाविश्वासो नोदियात् । कथमिति चेत्—ईश्वरस्यानभिमुखत्वात् कर्मयोगाद्यनर्हतापादकमहापराधान् कृतवतः, "[31]धिगशुचिमविनीतम्" इति श्लोकोक्तरीत्या सुदुर्लभफलप्रेप्साजनकं चापलमावहतः, एतत्फलार्थमनुष्ठेयतया प्रसक्तं साधनं कायक्लेश-अर्थव्यय-कालदैर्घ्यादिषु यत्किञ्चिदेकमप्यनपेक्षमाणमेकलं सकृदनुसन्धानं वा समुदायज्ञानपूर्वकसकृदुक्तिमात्रं वेति अनेन लघुतरोपायेन तस्य गुरुतरस्य फलस्य स्वोद्दिष्टकाले प्राप्तिं कामयित्वा एतस्य फलस्य "शुनामिव पुरोडाशः[32]" इति रीत्या जन्मवृत्तादिभिः वस्तुतः स्वयमनर्ह इति ज्ञातवतः कस्यचित् "सानुबन्धिकेन स्वेनायं पुरुषार्थः प्राप्स्यते" इति महाविश्वासोत्पत्तौ दौर्लभ्यमभिसन्धाय, "आढकद्वादशकतिलभारस्थाने तावत्तैलमासीत् (मापन्नम्)" इति श्रीगोविन्दाचार्योऽनुजग्राह किल। अत्र सर्वेश्वरस्य परत्वमात्रं बुध्वा दूरीभवनेन नराधम इति संज्ञां प्राप्तवन्तं जातनष्टमपेक्ष्य गोपिकावत् विवेकाभावेऽपि सौलभ्यं ज्ञात्वा तादृशकल्याणगुणकमेकं (भगवन्तं) यः समाश्रयति, स एव परमास्तिक इति श्रीवाहिहंसाम्बुदाचार्यानुगृहीता सूक्तिः ।

(महाविश्वासादीनां द्वयमन्त्रेऽनुसन्धानप्रदेशनिरूपणम्)

इत्थं पुरुषकारादिज्ञानेन निष्पन्नं विश्वासमहत्त्वं विश्वासस्वरूपं कार्पण्यं च, "प्रपद्ये" इति क्रियापदोपसर्गे,

शरणशब्दोपश्लिष्टे धातौ, उत्तमे चानुसन्धेयानि । अत्रोत्तमे विवक्षितमर्थम् "अनन्यशरणः" इति गद्ये व्याचचक्षे । अत्रोपायत्वाध्यवसायवाचकशब्दे गोप्तृत्ववरणमन्तर्नीतम् । "[33]अहमस्म्यपराधानामालयोऽकिञ्चनोऽगतिः", "त्वमेवोपायभूतो मे भवेति प्रार्थना मतिः । शरणागतिरित्युक्ता सा देवेऽस्मिन् प्रयुज्यताम् ॥" इति, "[34]उपाये गृहरक्षित्रोः शब्दः शरणमित्ययम् । वर्तते सांप्रतं त्वेष उपायैकवाचकः ॥" इति चोक्तरीत्या उपायान्तराशक्तस्य सर्वेश्वरः सर्वशास्त्रार्थसाधारणे रक्षकत्वमात्रेऽनवस्थाय, स्वीकृतभरः सन् उपायान्तरस्थानेऽपि निविशते इत्यतोऽपि, न्यस्तभरस्यास्याधिकारिणः पश्चात्कालेऽप्यनन्योपायत्वदार्ढ्यार्थंश्च उपायत्वाध्यवसायोऽत्र विवक्षितो भवति । उपायशब्दार्थस्य साधनविशेषमात्ररूपत्वेनास्योपायत्वस्य चेतनाचेतनसाधारणत्वात्, "[35]रक्षिष्यतीति विश्वासो गोप्तृत्ववरणं तथा" इति, "[36]सर्वज्ञोऽपि च विश्वेशः सदा कारुणिकोऽपि सन् । संसारतन्त्रवाहित्वात् रक्षापेक्षां प्रतीक्षते ॥" इति चोक्तरीत्या चेतनैकान्तस्य गोप्तृत्ववरणस्यानुसन्धेयत्वात् गोप्तृत्ववरणमत्र विवक्षितम् । तत्र शरणशब्देन एकस्मिन् प्रयोगेऽर्थद्वयाभिधानस्याशक्यत्वात् अस्याधिकारिणोऽसाधारण उपायत्वाध्यवसायोऽत्र शाब्दः, सर्वाधिकारिसाधारणं गोप्तृत्ववरणं च आर्थमिति भवितुमर्हति ॥

(अधिकारार्थसंग्राहिका गाथा)

(गाथा) बोधयामासुः स्नेहवन्तः सन्देहहेतुभूतोपायाभावरूप-कार्पण्ययदुःखे सहायभूतस्य परस्य वरणप्रकारम्, संबन्धस्वरूपांशेनाऽनापि विनाभूतानां सदृशा इति स्थितानां देवानां सविधे अस्माकं जन्मात्मकंदुःखं नाशयतेत्येवं याचनरूपोऽपराधो यथा न भवेत् तथा ॥

प्रख्यातः पञ्चषाङ्गः सकृदिति भगवच्छासनैरेष योगः
तत्र द्वाभ्यामपायाद्विरतिरनितरोपायतैकेन बोध्या ।
एकेन स्वान्तदार्ढ्यं निजभरविषयेऽन्येन तत्साध्यतेच्छा
तत्त्वज्ञानप्रयुक्ता त्विह सपरिकरे तादधीन्यादिबुद्धिः ॥

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु श्रीमद्रहस्यत्रयसारे,
परिकरविभागाधिकार एकादशः

श्रीमते निगमान्तमहादेशिकाय नमः

—०—०—

सरिवित्तनरन्बर् ऐयम्परुमुपायमिल्लात्
तुरवित्तनियिर्टरुणैयाम् परनै वरिक्कुम् वहै
उरवित्तनैयिन्रि योत्तारेन निन्र वुम्बर् नाम्
पिरवित्तुयर् शेकुम्पीरेन्निरक्कुम् पिढैयरवे.

श्रीः

साङ्गप्रपदनाधिकारः १२

अभीष्टे दुस्साधे स्वत इतरतो वा क्वचन तद्-
भरन्यासं याच्ञान्वितमभिवदन्ति प्रपदनम् ।
इतः पश्चादस्मद्यतननिरपेक्षेण भवता
समर्थ्योऽसावर्थस्त्विति मतिविशेषं तदविदुः ॥

(मुमुक्षुसाधारणाङ्गिस्वरूपनिरूपणम्)

मुमुक्षोरधिकारिणोऽस्मिन्नुपायेऽङ्गिस्वरूपं तावत्—**आभरणस्य तत्स्वामिने तेनैव रक्षणपूर्वकधार्यत्वार्थं प्रदानवत् यथावस्थित** आत्मनिक्षेपः । स च **प्रणवे प्रथमाक्षरे प्रकृतिप्रत्ययाभ्यां सर्वरक्षकत्वेन** सर्वशेषित्वेन च प्रतीतं **सर्वेश्वरं** प्रति— **आत्मात्मीयरक्षणव्यापारे आत्मात्मीयरक्षणफले** च **स्वाधीन**तया **स्वार्थतया** च स्वस्यान्वयो यथा न स्यात् तथा **भरन्यासप्रधानोऽत्यन्तपारतन्त्र्यविशिष्टशेषत्वानुसन्धानविशेषः** ॥

(अङ्गिस्वरूपानुष्ठानप्रकारः)

"[1]स्वात्मानं मयि निक्षिपेत्" इति **चोदितस्यानुसन्धान**विशेषस्यानुष्ठानप्रकारस्तावत्—**शेषिणा स्वतन्त्रेणेश्वरेण स्वप्रयोजनार्थं** स्वयंरक्षणानुगुणतयाऽनन्याहानन्याधीनशेषत्वात्यन्तपारतन्त्र्य-

वानहम् "[2]आत्मापि चायं न मम" इत्युक्तरीत्या मम शेषी नास्मि; किमपि निरुपाधिकतया मदीयमित्यनुसन्धातुमपि नार्होऽस्मि; "[3]स्वयं मृत्पिण्ड-भूतस्य परतन्त्रस्य देहिनः। स्वरक्षणेऽप्यशक्तस्य को हेतुः पररक्षणे॥" इत्युक्तरीत्या मां मदीयत्वेन प्रसिद्धं च अहं स्वतन्त्रः प्रधानफली च सन् रक्षितुं नार्होऽस्मि; "[4]आत्मा राज्यं धनं चैव कलत्रं वाहनानि च। एतत् भगवते सर्वमिति तत्प्रेक्षितं सदा" इति विवेचयनुसंहितक्रमेण मदीयानि आत्मात्मीयान्यपि तदीयान्येव; "[5]आत्मात्मीयभरन्यासो ह्यात्मनिक्षेप उच्यते" इत्युक्तेरेषां रक्षणभरोऽपि, "[6]न हि पालन-सामर्थ्यम् ऋते सर्वेश्वरं हरिम्" इत्युक्तरीत्या सर्वरक्षकस्य तस्यैव; "[7]तेन संरक्ष्यमाणस्य फले स्वाम्यवियुक्तता। केशवार्पणपर्यन्ता ह्यात्मनिक्षेप उच्यते" इत्युक्तरीत्या रक्षणफलमपि प्रधानफलिनस्तस्यैवेति भावनम्।

(मुमुक्षुबुभुक्षुसमर्पणयोर्विशेषः)

मुमुक्षुमात्रसामान्यं स्वरूपादिसमर्पणम्।
अकिञ्चने भरन्यासस्त्वधिकोऽङ्गितया स्थितः॥
अत्र रक्षाभरन्यासः समः सर्वफलार्थिनाम्।
स्वरूपफलनिक्षेपस्त्वधिको मोक्षकाङ्क्षिणाम्॥

(ईश्वरस्य प्रधानफलित्वम्)

फलार्थिनि उपायानुष्ठातरि जीवे फलिनि विद्यमाने सति ईश्वरोऽत्र प्रधानफली कथं भवतीति चेत्—अचितः परिणामा इव चिद्रूपः स्वेन प्रत्ताः पुरुषार्था अपि सर्वशेषिणं स्वं नन्दयन्तीति हेतोरीश्वरः प्रधानफली संपद्यते। अचेतनायाः प्रतिमाया अवस्थापरि-

वर्तनेन आभरणधारणाधानेन च तत्सौन्दर्यस्य दर्शनेन नन्दने, चेतनस्य शुकस्य पञ्जरे निधानपूर्वं क्षीरदानेन स्वैरं बहुलं सञ्चारणेन च तदीयानन्दस्य दर्शनेन नन्दने च नास्ति किल तारतम्यं निरपेक्षाणां रसिकानाम् ॥ अतोऽत्र—

स्वनिर्भरत्वपर्यन्तरक्षकैकार्थ्यभावनम् ।
त्यक्तरक्षाफलस्वाम्यं रक्ष्यस्याऽऽत्मसमर्पणम् ॥

(श्रीयामुनाचार्यसूक्त्यर्थतत्त्वम्)

स्तोत्रे, "8वपुरादिषु योऽपि कोऽपि वा गुणतोऽसानि यथातथाविधः । तदयं तव पादपद्मयोरहमद्यैव मया समर्पितः ॥" इत्यस्य किं तात्पर्यमिति चेत्—कृतमुद्रायां राज्ञो भूषणनीव्यां केनचिद्धेतुना स्वहस्तगतायां सत्याम्, राजा स्वीकुर्यादिति (धिया) अन्तःस्थितमाणिक्यस्य स्वरूपस्वभावौ विशदमज्ञात्वाऽपि नीव्या सह (माणिक्यं) यथा पुनः प्रत्यर्प्यते, तथा देहाद्यतिरिक्तस्यात्मनः स्वरूपस्वभावस्थिती विशदं विवेक्तुमविजानद्भिरपि विद्यमानं ज्ञानमवलम्ब्याऽऽत्मसमर्पणे कृते सति, तावन्मात्रेणापि अनादिकालकृतात्मापहारचौर्यजनितो भगवन्निग्रहः शाम्येदित्यस्मिन् शास्त्रार्थे तात्पर्यम् । एतदग्रे, "9मम नाथ यदस्ति" इति श्लोके एतत्समर्पणविषयेऽनुशयकरणमपि—स्वरूपादिविवेकं विना समर्पणे प्रवृत्तावपि स्वकीयं द्रव्यं राज्ञे उपहारत्वेन ददान इव मदीयमित्यभिमानेन सह यदि समर्पयेत, तर्हि आत्मापहारचौर्यमुन्मूलितं न भवतीत्येतज्ज्ञापनार्थम् । न तु शास्त्रचोदितस्य स्वानुष्ठितस्य समर्पणस्याकृत्यत्वापादनार्थम् ।

तदेवं द्वाभ्यां श्लोकाभ्याम्—**यथावस्थितस्वरूपादिविवेके** असत्यपि, **न ममेति** स्वस्वसम्बन्धलवनमेव "[10]अहमपि तवैवास्मि हि भरः" इति वर्णनार्हभर**समर्पणप्रधाने शास्त्रार्थे सार** इति सिद्धम् ।

(द्वयेऽङ्गिस्वरूपस्यानुसन्धानप्रदेशः)

इत्थं **शेषत्वानुसन्धानविशिष्टं स्वरक्षाभरसमर्पणं द्वये उपायपरे पूर्वखण्डे महाविश्वासपूर्वकगोप्तृत्ववरणगर्भशरणशब्दोपश्लिष्टक्रियापदे** समुच्चित्यानुसन्धातुं युक्तम् ।

इत्थमेषु षट्सु अस्मिन् **मन्त्रे विमर्शदशायां** पृथक् पृथगनुसंहितेषु सत्स्वपि **वाक्यार्थप्रतिपत्तिदशायामन्यान्यवाक्यार्थवत् साङ्गं** प्रधानमेकबुद्ध्यारूढं भवति । अतो **यथाशास्त्रं साङ्गप्रपदनानुष्ठानं सकृत्कर्तव्यमिति** सिद्धम् । **अनेकव्यापारसाध्यो धानुष्कस्य** लक्ष्यवेधार्थो **बाणमोक्षो** यथा **क्षणकृत्यं** (क्षणकालसाध्यो) भवति, तथेदमात्मरक्षाभरसमर्पणं भवतीति श्रुतिसिद्धम् ।

अस्य भरसमर्पणस्यैव **प्रपत्तिमन्त्रेषु प्राधान्येनानुसन्धेयताम्** "[11]अनेनैव तु मन्त्रेण स्वात्मानं मयि निक्षिपेत् । मयि निक्षिप्तकर्तव्यः कृतकृत्यो भविष्यति ॥" इति **सात्यकितन्त्रे भरस्वीकर्ता शरण्यः** स्वयं विशदमनुजग्राह ॥

(निष्कृष्टसाङ्गानुष्ठानस्वरूपनिरूपणम्)

अत्र साङ्गानुष्ठानतया निष्कृष्टं तावत्—**कर्तृत्वत्याग-ममता-त्याग-फलत्याग-फलोपायत्वत्यागपूर्वकं** आनुकूल्यसंकल्पाद्यर्थानुसन्धानेन सह **गुरुपरम्परोपसत्तिपूर्वकद्वयवचनमुखेन स्वरूपफलन्यासगर्भात्मरक्षाभरसमर्पणकरणम्** ।

अस्य कर्तृत्वत्यागस्य निबन्धनम्—स्वगतं कर्तृत्वमपि तन्मूलतया प्राप्तमिति स्वस्य यावदात्मभाविनो भगवदेकपारतन्त्र्यस्य ज्ञानम्। ममतात्यागस्य फलत्यागस्य च निबन्धनम् आत्मात्मीयानां स्वरूपानुबन्धिनो भगवदेकशेषत्वस्य ज्ञानम्। फलोपायत्वत्यागस्य निबन्धनम्—शरण्यप्रसादनस्यैतदीयानुष्ठानस्य प्रधानफलं प्रति व्यवहितकारणत्वम्, अचेतनत्वात् फलप्रदानसंकल्पानाश्रयत्वं च।

ईश्वरस्य फलोपायत्वं तावत् सहजसौहार्दात् करणकलेबरप्रदानादारभ्य द्वयोच्चारणपर्यन्तं सर्वं प्रति आदिकारणभूतस्य स्वस्य प्रसादपूर्वकसंकल्पविशेषविशिष्टरूपेणाव्यवहितकारणत्वात्, उपायान्तरशून्यस्य विषये तत्तदुपायस्थाननिवेशाच्च। एवंभावस्य मूलं धर्मिग्राहकशास्त्रावगतो वस्तुस्वभाव इति, अयमर्थो युक्तिभिर्विचालयितुं न युज्यते।

अस्य साङ्गानुष्ठानस्य वात्स्यवरदाचार्यानुगृहीतः संग्रहो यथा—"अनादिकालात् भवदनिष्टाचरणात् संसृतवानस्मि, अद्यप्रभृति अनुकूलो वर्तेय, प्रतिकूलाचरणं न कुर्याम्, भवत्प्राप्त्यर्थं मद्धस्ते किमपि मूलधनं नास्ति, भवन्तमेवोपायतया निरचैषम्, भवानेवोपायो भवतु, अनिष्टनिवृत्ताविष्टप्राप्तौ वा ममेतः परं किं भरोऽस्ति" इति।

(उत्तरकालानुवृत्तानामानुकूल्य-तत्संकल्पादीनामनङ्गत्वम्)

अत्रानुकूल्यसंकल्पादीनि उपायपरिकरतया सकृत् कर्तव्यानि भवन्ति। पश्चादेतत्प्रार्थितानुकूलवृत्त्यादिसाहित्यमपि उपायफलात्मकम्। प्रातिकूल्यवर्जनमपि वात्स्यवरदाचार्यानुगृहीतरीत्याऽऽनुकूल्यसंकल्पवत् संकल्परूपत्वे सकृत्कर्तव्यमित्ययमर्थः सुस्पष्टः। "[12]अपायेभ्यो निवृत्तोऽस्मि" इत्युक्तरीत्याऽभिसन्धिविरामरूपत्वेऽपि वा प्रातिकूल्यस्वरूपनिवृत्तिरूपत्वेऽपि वा तत्र प्रथमक्षणकालिकमङ्गं भवति; पाश्चात्यं च फलं भवितुमर्हति। एवं विश्वासेऽपि द्रष्टव्यम्।

प्रवृत्तिरनुकूलेषु निवृत्तिश्चान्यतः फलम्।
प्रारब्धसुकृताच्च स्यात् संकल्पे च प्रपत्तितः॥

अतो जीवनकाले निरपराधकैङ्कर्यं प्रारब्धशरीरानन्तरं मोक्षं च समुच्चित्य फलत्वेनोद्दिश्य प्रपत्त्यनुष्ठायिनस्तावत् निपुणाः॥

(अधिकारार्थसंग्राहिका गाथा)

वेदमकुटधरा अस्मत्स्वामिनः, निवर्ततां भर इति (मत्वा) अस्मान् रक्ष्यवस्तुत्वेन समर्पितवन्तः, तदाऽस्मान् प्राप्तुमभिलष्य महतीं कृपामावहतो महोपकारकस्य चरणयोरधस्तात्, सम्बन्धमात्रादेतदीयात्मस्वरूपरक्षकस्यैकस्यात्मनो याथात्म्यं त्वं मा विस्मार्षीरिति (उपदिश्य)॥

अरवे परमेन्रडैक्कलम् वैत्तनर् नम्मै
पेरवेकरुदिप् पेरुन्दहवुर्द्र पिरानडिक्कीऴ्
उरवे यिवनुयिर् काक्किन्र वोरुयिरुण्मैयै नी
मरवेलेन नम् मरैमुडिशूडिय मन्नवरे.

युग्यस्यन्दनसारथिक्रमवति तय्यन्तसन्दर्शिते
तत्त्वानां त्रितये यथार्हविविधव्यापारसन्तानिनि ।
हेतुत्वं त्रिषु कर्तृभाव उभयोः स्वाधीनतैकत्र तत्
स्वामिस्वीकृतयद्भरोऽयमलसस्तत्र स्वयं निर्भरः ॥

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीमद्रहस्यत्रयसारे अधिकारिविभागाधिकारो द्वादशः ॥

श्रीमते निगमान्तमहादेशिकाय नमः

—०—०—

श्रीः

कृतकृत्याधिकारः १३

समर्थे सर्वज्ञे सहजसुहृदि स्वीकृतभरे
यदर्थं कर्तव्यं न पुनरिह यत्किञ्चिदपि नः ।
नियच्छन्तस्तस्मिन् निरुपधिमहानन्दजलधौ
कृतार्थीकुर्मः स्वं कृपणमपि कैङ्कर्यधनिनः ॥

(प्रपन्नस्य कृतकृत्यत्वम्)

एतदुपायविशेषनिष्ठः स्वोद्दिष्टस्यैतत्फलस्य कृते प्रपत्त्यनन्तर-कालमारभ्य स्वस्य कर्तव्यांशेऽन्वयाभावात्, कर्तव्यांशस्य सकृदनुष्ठानेन निष्पन्नत्वात्, स्वतन्त्रेण सत्यसंकल्पेन फलप्रदेन "मा शुचः" इत्यनुगृहीतत्वात्, स्वस्य निष्पन्नां भरन्यासरूपदशां दृष्ट्वा निर्भरः

"मामेकं शरणं व्रज" इत्युक्तरीत्या सिद्धोपायत्वेन स्वीकृतेन सर्वेश्वरेण, "अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि" इति फलप्रदानसंकल्पस्य करणात् एवं विश्वसनीयं समर्थमुपाय-भूतमीश्वरमवलोक्य फलसिद्धौ निस्संशयो निर्भयश्च,

वासना अपि यथा नष्टाः स्युस्तथा त्यक्तान् अन्यपुरुषार्थान्, वृत्तान्यपि यथा निवर्तेरन् तथा त्यक्तानि उपायान्तराणि, यथा अकिञ्चनोऽयत्नेन महानिधिं लभेत तथा स्वेन लप्स्यमानं परमपुरुषार्थं च दृष्ट्वा हृष्टमनाः,

"देवर्षिभूतात्मनृणां पितॄणां न किङ्करो नायमृणी च राजन्। सर्वात्मना यः शरणं शरण्यं नारायणं लोकगुरुं प्रपन्नः ॥" इति श्लोकोक्त-प्रकारेण, प्रजापतिः पशुपतिरित्येवंनामानि बिभ्रतः सजातीयान् क्षेत्रज्ञान् प्रति तत्तदवसरेषु करगृहीतभृतिसदृशोपाधिविशेषहेतुकतया लेखनानर्हवेदारूढं दास्यपत्रम्, मूलधनतीरणं विनैव वृद्धिविधानानु-वृत्तमृणपत्रं च छिन्नवान् यतः, ततः पञ्चमहायज्ञादिषु नित्यनैमित्तिकेषु तन्नामो(देवतान्तरनामो)च्चारणावसरे "[2]ये यजन्ति पितॄन् देवान् ब्राह्मणान् सहुताशनान्। सर्वभूतान्तरात्मानं विष्णुमेव यजन्ति ते ॥" इत्यादिषु महर्षिभिर्निर्धारितया रीत्या,

राज्ञः कञ्चुकस्योपरि मालाया आभरणस्य च समर्पणेऽपि कञ्चुके (उद्देश्यत्व)संबन्धं हित्वा राजप्रीतिमेव प्रयोजनतया राजसेवको यथा विशदं प्रतिबुध्यते तथा,

[3]यज्ञाग्रहराध्यायादिषु, [4]श्रीहस्तिगिरिमाहात्म्ये, "[5]साक्षादप्यविरोधं जैमिनिः" इति सूत्रे चोक्तया रीत्या देवपित्रादिरूपकञ्चुकसंबन्धेनैव तत्तच्छब्दानामवयवशक्तिपौष्कल्यैरीश्वरविषये नारायणादिशब्दवत् (वाचकतया) अवस्थितिं च निरीक्ष्य तेषामुच्चारणादिषु श्वेतद्वीपवासिनां शुद्धयाजिनामिव स्वस्य परमैकान्तित्वस्याक्षततया स्थितिं निरूप्य,

स्ववर्णाश्रमनिमित्तगुणाद्यधिकारानुरूपदास्यग्रहणं संकल्पितवतः शासितुः शेषिणः शास्त्रवेद्याज्ञापरिपालनरूपकैङ्कर्यमुखेन, प्रत्यक्षविदितपरमपुरुषाभिप्रायकमुक्तवत् किञ्चित्कुर्वन् मुक्ततुल्यः सन्

उपायपूर्त्या कृतकृत्य इति पुरुषार्थपूर्त्या कृतार्थ इति च शास्त्रैस्तन्निष्ठैश्चाभिनन्दनीयो भवति ॥

(गद्यवाक्यतात्पर्यम्)

एतदीयमिदं कृतकृत्यत्वानुसंधानम्, "[6]अतस्त्वं तव तत्त्वतो मज्ज्ञानदर्शनप्राप्तिषु निस्संशयः सुखमास्व" इति शरणागतिगद्ये निगमयामास । अस्यायं भावः—अनादेः कालादाज्ञातिलङ्घनहेतुकभगवन्निग्रहेण संसारमनुप्राप्तानामस्माकमवसरप्रतीक्षभगवत्कृपाहेतुकसदाचार्यकटाक्षविषयीकारनिबन्धनद्वयोच्चारणानूच्चारणेन प्रपत्त्यनुष्ठाने निष्पन्ने शरण्यप्रसादनेऽन्वितः परं (कर्तव्यस्य) कस्याप्यभावात् निग्रहहेतून् सर्वान् क्षान्त्वा, सविश्वासमश्रितान् दासान् परिष्कृत्य कैङ्कर्यस्य ग्रहणे समर्थः सर्वशेषी श्रियः पतिः स्वप्रयोजनभावेन स्वयमेव रक्षेदिति विश्वस्य निर्भरो भवेति । अयं "मा शुचः" इति शरण्यवाक्ये निष्कृष्टोऽर्थः ॥

(शोकतदभावकालव्यवस्था)

अस्य प्रपत्तिप्राक्कालिकस्य शोकस्याधिकारकोटिनिविष्टत्वात् प्राक् अशोचने अधिकारित्वासिद्धेः, "कारणाभावात् कार्याभावः" इति न्यायेन उपायनिष्पत्तिर्न सिद्ध्येत्। उपायस्वीकारं कृतवानित्यभिमत्य पश्चात् शरण्योक्तौ सन्दिहानः शोचेच्चेत्, "कार्याभावात् सामग्र्यभावः" इति न्यायेन पूर्णोपायत्वासिद्धेः, फलमुपायपूर्तिसापेक्षं सत् विलम्बेतेति वेदितुं युक्तम्। प्राक् प्रसक्तशोकः, पश्चात् "मा शुचः" इति प्रतिषेधनमनुसृत्य वीतशोकीभूतः कृतकृत्य इति ज्ञातुं युक्तम् ॥

(अधिकारार्थसंग्राहिका गाथा)

प्रेमवश्यसु, 'को वरो देयः' इति आस्थावता हस्तिगिरिनाथेन लक्ष्मीव्यामुग्धेन, पूर्वमेव प्रयस्य रक्ष्यवस्तुत्वेन स्वीकृता आस्माकाः मुख्याः राजतुल्याः देवतुल्याः देवदेवनिवासभूतोपरितनलोकप्रवणसूरितुल्याः हंसतुल्याः समापितसर्वयज्ञपुरुषतुल्याश्च भवन्ति।

भगवति हरौ पारं गन्तुं भरन्यसनं कृतम्
परिमितसुखप्राप्त्यै कृत्यं प्रहीणमकृत्यवत्।

मन्नवर् विण्णवर् वानोरिरै योत्रम् वान् करुत्तोर्
अन्नवर् वेळ्वियनैत्तु मुडित्तनर् अन्बुडैयारक्कु
एन्न वरन्तरवेन्र नम्मत्तिगिरित्तिरुमाल्
मुन्नम्वरुन्दियडैक्कलङ्कोण्ड नम्मुक्कियरे.

भवति च वपुर्वृत्तिः पूर्वं कृतैर्नियतक्रमा
परमिह विभोराज्ञासेतुर्बुधैरनुपाल्यते ॥

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीमद्रहस्यत्रयसारे कृतकृत्याधिकारस्त्रयोदशः ॥

श्रीमते निगमान्तमहादेशिकाय नमः

—o—o—

श्रीः

स्वनिष्ठाभिज्ञानाधिकारः १४

स्वरूपोपायार्थेष्ववितथनिविष्टस्थिरमतेः
स्वनिष्ठाभिज्ञानं सुभगमपवर्गादुपनतात् ।
प्रथिम्ना यस्याऽऽदौ प्रभवति विनीतः स्थगयितुं
गभीरान् दुष्पूरान् गगनमहतश्छिद्रनिवहान् ॥

एवं स्वस्य निष्ठाऽस्तीति स्वेन कथं ज्ञायतामिति चेत्—

(स्वरूपविषये स्वनिष्ठाभिज्ञाननिरूपणम्)

परैः परिभवादिषु आपन्नेषु सत्सु देहादिकमवलम्ब्य परिभावकैरुच्यमानानां दोषाणां स्वस्वरूपासंस्पर्शस्य निरूपणेन विषादादिराहित्येनावस्थानम्, "[1]शप्यमानस्य यत् पापं शपन्तमधिगच्छति" इत्युक्तरीत्या परिभवादिना स्वपापं प्रतिगृह्णतो दुर्बुद्धीन् प्रति, "[2]बद्ध-

वैरागि भूतानि द्वेषं कुर्वन्ति चेत्, ततः । शोच्यान्यहोऽतिमोहेन व्याप्तानीति मनीषिणा ॥", "[3]आत्मद्रुहममर्यादं मूढमुज्झितसत्पथम् । सुतरामनुकम्पेत नरकार्चिष्मदिन्धनम्" इत्युक्तरीत्या पारातिलङ्घिनी कृपा, "[4]अमर्यादः क्षुद्रः" इति श्लोकेन, "[5]क्रान्तोऽभवम् क्रान्तोभूत्वा" इत्यादिभिर्दिव्यसूरिगाथाभिश्च स्वस्यानुसन्धेयतयोदाहृतान् दोषान् परिभवादिभिः (इमे) विस्मरणागोचरान् अकार्षुरित्युपकारस्मृतिः, आत्मनां सर्वेषां स्वरूपानुबन्धिभगवत्पारतन्त्र्यं क्षेत्रज्ञानां सर्वेषां कर्मवश्यतयाऽवस्थितिं च दृष्ट्वा, अस्मासु अस्मत्परिभावकचेतनेषु च विद्यमानकर्मानुगुणरसावहामिमां लीलां कुर्वाणेन स्वतन्त्रशेषिणा प्रेरितास्ते परिभवादिकं कुर्वन्तीति तद्विषये निर्विकारचित्तता, प्रारब्धपापविशेषः कृत्तशिखो भवतीति सन्तोषश्च प्रवर्तन्ते चेत्—प्रथममध्यमपदयोः शोधितरीत्या अचिद्वैलक्षण्यम्, सर्वभूतानुकूल्यादियोग्यं ज्ञानम्, सर्वतोमुखमाकिञ्चन्यम्, स्वतः सर्वसमस्य कर्मानुरूपफलप्रदस्य स्वतन्त्रशेषिण इष्टविनियोगार्हतापादके अनन्यार्हशेषत्वपारतन्त्र्ये, "[6]यद्धितं मम देवेश" इत्याद्युक्तरीत्या पराधीनहितसिद्धिं च बिभ्राणे स्वस्वरूपे निष्ठाऽस्तीति अभिज्ञायेत ।

(उपायविषये तन्निरूपणम्)

सर्वेश्वरं विना स्वात्मा च परे च स्वस्य न रक्षका इति बुद्धिः, मृत्युपर्यन्तभयहेतुदर्शनेऽपि "[7]प्रायेणाकृतकृत्यत्वात् मृत्योरुद्विजते जनः । कृतकृत्याः प्रतीक्षन्ते मृत्युं प्रियमिवातिथिम् ॥" इत्युक्तरीत्या

5 वाडिनेन् वाडि—पेरियतिरुमोडि 1-1-1

एतच्छरीरानन्तरं किं दुःखमनुभविष्याम इत्युद्वेगं हित्वा अभिमतासत्त्या संप्रीततयाऽवस्थानम्, "[8]गजं वा वीक्ष्य सिंहं वा व्याघ्रं वाऽपि वरानना। नाहारयति संत्रासं बाहू रामस्य संश्रिता" इति, "[9]असंदेशात् तु रामस्य तपसश्चानुपालनात्। न त्वा कुर्मि दशग्रीव भस्म भस्मार्ह! तेजसा॥" इति, "[10]शरैस्तु संकुलां कृत्वा लङ्कां परबलार्दनः। मां नयेत् यदि काकुत्स्थस्तत् तस्य सदृशं भवेत्॥" इति श्रीजानक्या अनुष्ठाय प्रदर्शितरीतिकेन रक्षकावष्टम्भेन जातः समाश्वासः, स्वकृतभरन्यासफलविषये स्वयत्नराहित्यम्, तत्रानिष्टनिवृत्तिरिष्टप्राप्तिश्च तद्धस्ताधीने इति विस्रम्भश्च वर्तेरंश्चेत्—स्वोद्दिष्टसकलफलसाधने चरमश्लोकपूर्वखण्डविहिते, द्वयपूर्वखण्डेऽनुसन्धेये, श्रीमन्त्रमध्यमपदविवक्षिते उपाये स्वस्य निष्ठाऽस्तीति सुखमभिज्ञातुम्।

(पुरुषार्थविषये तन्निरूपणम्)

"[11]उत्पत्तिस्थितिनाशानां स्थितौ चिन्ता कुतस्तव। यथोत्पत्तिर्यथा नाशः, स्थितिस्तद्वत् भविष्यति॥", "[12]अचेष्टमानमासीनं श्रीः कञ्चिदुपतिष्ठति। कर्मी कर्मानुसृत्यान्यो न प्राश्यमधिगच्छति॥" इत्युक्तरीत्या प्रारब्धकर्मविशेषाधीनतयेश्वरेण कार्यमाणे देहयात्रादौ चिन्तां त्यक्त्वा, स्वेन चिन्तायां क्रियमाणायामपि, "[13]उत्पतन्नपि चाकाशं विशन्नपि रसातलम्। अटन्नपि महीं कृत्स्नां नादत्तमुपतिष्ठते॥", [14]यत् किञ्चित् वर्तते लोके सर्वं तन्मद्विचेष्टितम्। अन्यो ह्यन्यच्चिन्तयति स्वच्छन्दं विदधाम्यहम्॥" इत्युक्तरीत्या ईश्वरसंकल्पमननुसृत्य न किञ्चिन्निर्वर्ततेति प्रतिसन्धाय, "[15]अप्रयत्नागताः सेव्याः गृहस्थै-

विषयाः सदा। प्रयत्नेनापि कर्तव्यः स्वधर्म इति मे मतिः ॥", "[16]नाहारं चिन्तयेत् प्राज्ञो धर्ममेवानुचिन्तयेत्। आहारो हि मनुष्याणां जन्मना सह जायते ॥" इति **पराशरगीतादिषु**, "[17]न संनिपतितं धर्म्यमुपभोगं यदृच्छया। प्रत्याचक्षे न चाप्येनमनुरुन्धे सुदुर्लभम् ॥" **इत्यजगरोपाख्याने** चोक्तरीत्या शास्त्राविरुद्धविषयेषु स्वस्मिन् उपायविशेषमकुर्वत्यपि भगवत्संकल्पमात्रेण स्वयमेव प्राप्तेषु तान् अवेक्ष्य, प्रारब्धकर्मफलमृणं नश्यतीति, अनिवारणेनानुभवनम्— इत्थं **कर्मविशेषाधीनतयोपनमतोः प्राप्यान्तरलाभालाभयोः**, "[18]तयोरेकतरो राशिर्यद्येनमुपसंनमेत्। न सुखं प्राप्य संहृष्येन्न दुःखं प्राप्य संज्वरेत् ॥" इति, "[19](धनं) अस्तीति न दृप्यन्ति" इति चोक्तरीत्या हर्षशोकत्यागेन सह **स्वरूपानुरूपे परमप्राप्यकैङ्कर्ये रुचिः**, **स्तोत्रे श्रीवैकुण्ठगद्यादिषु** च [दर्शिता] "कदा, कदा" इति मुखविलापं कारयन्ती प्राप्तौ त्वरा च यदि प्रवर्तेरन्— तर्हि **श्रीमन्त्रे नारायणशब्दे चतुर्थ्यां, द्वये चतुर्थीनमोभ्याम्, चरमश्लोके "अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि" इति वाक्येन** च हस्तनिर्देशकृतमुद्राप्रदर्शनतुल्यप्रदर्शनविषयीकृते अपरिच्छेद्ये परमपुरुषार्थे निष्ठाऽस्तीति सुज्ञानम्।

(**स्वनिष्ठाप्रयोजननिरूपणम्**)

इत्थं तत्तदभिज्ञानैः, "[20]अहमात्मा न देहोऽस्मि विष्णुशेषोऽपरिग्रहः। तमेव शरणं प्राप्तस्तत्कैङ्कर्यचिकीर्षया ॥" इत्युक्तरीत्या **मूलमन्त्रादिसहकारेण स्वरूपोपायपुरुषार्थेषु** स्वनिष्ठामभिज्ञाय

19 उलदेत्तिरुमावार्-2 तिरुवन्तादि 45

8

चरतोऽस्याधिकारिणः, "21 नैषा पश्यति राक्षस्यो नेमान् पुष्प-फलद्रुमान् । एकस्थहृदया नूनं राममेवानुपश्यति ॥" इतिरीत्या **विरोधिभिः** सह वर्तमानस्य **अस्य पाक्षिकतया संभावितेषु ब्रह्म-विदपचारव्यतिरिक्तेषु** येषु केषु चित् **भीतिहेतुषु, स्वरूपप्राप्त-कैङ्कर्यव्यतिरिक्तेषु** येषु केषुचित् **प्रीतिहेतुषु** च दृष्टिपातो न भवेत् । यदृच्छया संभवेऽपि तैर्भीतिः प्रीतिश्च नोदियात् ॥

(अधिकारार्थसंग्राहिका गाथा)

मुख्यमन्त्रप्रदर्शिते त्रितये निष्ठावन्तः स्वानुरूपमिच्छन्तः अननुरूपं किमपि अनिच्छन्तः, इमानि **कर्माणि** अस्माकं सन्नीति-**लक्षणेन** सम्यक् ज्ञातवन्तः मेदिनीवर्तिदिविषदो भवन्ति ।

स्वापोद्बोधव्यतिकरनिभे भोगमोक्षान्तराले
कालं कञ्चिज्जगति विधिना केनचित् स्थाप्यमानाः ।
तत्त्वोपायप्रभृतिविषये स्वामिदत्तां स्वनिष्ठां
शेषां कृत्वा शिरसि कृतिनः शेषमायुर्नयन्ति ॥

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीमद्रहस्यत्रयसारे स्वनिष्ठाभिज्ञानाधिकारश्चतुर्दशः
श्रीमते निगमान्तमहादेशिकाय नमः

—०—०—

मुक्किय मन्तिरङ्गाट्टिय मून्ऱिल् निलैयुडैयार्
तक्कवैयन्ऱित्तहादवै योन्ऱु तमक्किशैयार्
इक्करुमङ्गलेमक्कुल वेन्ऱु मिलेक्कणत्ताल्
मिक्क गुणर्त्तियर् मेदिनिमिविय विण्णवरे.